The most important work under this category is the Bhāvanāpuruṣottama of Ratnakheṭa Śrīnivāsa Dīkṣita, the father of Rājacūḍāmani Dīkṣita. Three copies of this work are described under Nos. 4427-29. The work was composed prior to 1589 A. D. for the Ms. No. 4427 purports to have been copied in that year.

॥ नाटकानि ॥

NĀTAKAS.



A

DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

TANJORE MAHĀRĀJA SERFOJI'S

SARASVATĪ MAHĀL LIBRARY.

॥ अनर्घराघवनाटकम् ॥

4247. ANARGHARĀGHAVANĀṬAKAM.

Burnell's Catalogue No. 5152. Page 171. Right column. Substance—Paper. Size—$11\frac{1}{4} \times 4\frac{1}{8}$ inches. Sheets—81. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—2040. Author—Murāri. Complete.

Beginning:

निष्प्रत्यूहमुपास्महे भगवतः कौमोदकीलक्ष्मणः

कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने ।

याभ्यामर्धनिबोधमुग्धमधुरश्रीरर्धनिद्रापितः

नाभीपल्वलपुण्डरीकमुकुळः कम्बोः सपत्नीकृतः ॥

* * * *

तत्रापि तावन्निरूपयामि रूपकमभिरूपकमीश्वरम् ।

(मुहूर्तमिव स्थित्वा, स्मरणमभिनीय सोल्लासम्)

अस्ति तत्रभवतो मौद्गल्यगोत्रसमुद्भूतस्य महाकवेः भट्ट-

श्रीवर्धमानतनूजन्मनः तन्तुमतीनन्दनस्य मुरारेः कृतिर-

भिनवमनर्घराघवं नाम नाटकम् । तत्प्रयुञ्जानाः सामा-

जिकाननुवास्महे ॥

End:

तथापीदमस्तु ॥

समुन्मीलत्सूक्तिस्तबकमकरन्दैः श्रवणयो-

रविश्रान्तश्चुतास्तनपनमुपचिन्वन्तु कवयः ।

न शब्दब्रह्मोत्थं परिमलमनाघ्राय च जनः

कवीनां गम्भीरे वचसि गुणदोषौ रचयतु ॥

इति निष्क्रान्ताः सर्वे । सप्तमोऽङ्कः ।

Colophon:

समाप्तमिदं महाकवेर्मौद्गल्यावनस्य श्रीमुरारेः कृतिरनर्घराघवं नाम

नाटकम् ॥

Subject: Anargharāghavanāṭaka 1–7 Aṅkas Complete.

Remarks:—The Ms. is in a good condition.

This drama deals with the story of Rāma. There are several editions of this work available, the most important being the Nirṇayasāgara edition. Opinions vary regarding the date of the author. Dr. Keith and others place him before Ratnākara (i.e.) in the middle of the 9th century. Bhavanāthasvāmin and others are inclined to refer him to the 11th century. Now several Murāris are known to us:

1. The author of the Mimāmsā works-Tripādīnītinayanam, Aṅgatvanirukti etc.

2. The author of a kośa

3. The Murāri referred to in the familiar saying मुरारेः

तृतीयः पन्थाः

4. Besides we have the author of the Anagharāghava. We do not know whether all these are identical or different.

॥ अनर्घराघवनाटकम् ॥

4248. ANARGHARĀGHAVANĀṬAKAM.

Burnell's Catalogue No. 5158. Page 171. Right column. Substance—Paper. Size—$10\frac{1}{4} \times 4\frac{1}{2}$ inches. Sheets—110. Lines—9-11 to a Page. Script—Devanāgarī. No. of Granthas—2040. Author—Murāri. Complete.

Beginning, end, colophon and subject—Same as No. 4247.

Remarks:—The Ms. is in good condition. After the Bharatavākya the following three verses are found in addition:

अपि च—

देवस्यात्मभूः कमण्डलुजलस्रोतांसि मन्दाकिनी

गङ्गा भोगवती मयानिपुनते यावत्त्रिलोकीमिमाम् ।

तावद्वीरयशोरसायनमधुस्यन्दः कवीनामयं

जागर्तु श्रुतिशष्कुलीवलयितव्योमावगाही गुणः ॥ ५२ ॥

सम्यक्संबोधविद्वां जनविमलमनोदृष्टवस्तुस्थितीना

मास्ते किंचिन्मुनीनामभणितमिति तेनैव काव्यावतारः ।

वाल्मीकेरेव वाचामवनितलविनिर्गन्तुवैदेशिकीनां

कालेनायं विवर्तैः किमपि लिपिकरः केवलोऽहं मुरारिः ॥ ५३ ॥

देवीं वाचमुपासते हि बहवः सारं तु सारस्वतं
जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः ।
अब्धिर्लङ्घित एव वानरभटैः किन्त्वस्य गम्भीरता-
मापातालनिमग्नपीवरतनुर्जानाति मन्थाचलः ॥ ५४ ॥

॥ अनर्घराघवनाटकम् ॥

4249. ANARGHARĀGHAVANĀṬAKAM.

Burnell's Catalogue No. 5154. Page 171. Right column. Substance—Paper. Size—9¾ × 4½ inches. Sheets—104. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—2040. Author—Murāri. Complete.

Beginning and end—Same as No. 4248.

Colophon:

नायकानन्दः सप्तमोऽङ्कः । समाप्तं अनर्घराघवं नाम नाटकम् ।
कृतिः महाकवेः मौद्गल्यायनस्य श्रीमन्महोपाध्यायवर्धमान-
नन्दनस्य श्रीमुरारेः ॥

Remarks:—The Ms. is in good condition though old.

॥ अनर्घराघवनाटकम् ॥

4250. ANARGHARĀGHAVANĀṬAKAM.

Burnell's Catalogue No. 5156. Page 171. Right column. Substance—Paper. Size—14 × 6 inches. Sheets—64. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—2040. Author—Murāri. Complete.

Beginning, end, colophon and subject—Same as No. 4248.

Remarks:—This is a copy of the No. 4249. This Ms. in European paper is in excellent condition. The paper bears the watermark of 1803 A.D.

॥ अनर्घराघवनाटकम् ॥

4251. ANARGHARĀGHAVANĀṬAKAM.

Burnell's Catalogue No. 5316. Page 171. Right column. Substance—Paper. Size—14 × 6 inches. Sheets—79. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2040. Author—Murāri. Complete.

Beginning, end, colophon and subject—Same as No. 4248.

Remarks:—The Ms. is in excellent condition.

॥ अनर्घराघवनाटकम् ॥

4252. ANARGHARĀGHAVANĀṬAKAM.

Burnell's Catalogue No. 5317. Page 171. Right column. Substance—Paper. Size—14 × 5¾ inches. Sheets—84. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2040. Author—Murāri. Complete.

Beginning, end, colophon and subject—Same as No. 4248.

Remarks:—The Ms. is in Eurpoean paper and is in excellent condition.

॥ अनर्घराघवनाटकम् ॥

4253. ANARGHARĀGHAVANĀṬAKAM.

T. S. Collection No. 787. Substance—Paper. Size—10 × 4½

inches. Sheets—81 (2-88). Lines—9 to a Page. Script—Devanāgari. No. of Granthas—1800. Author—Murāri. Incomplete.

Beginning:

सुचरितो नाम मत्स्यपुत्रोऽस्मत्सुहृत् ॥

End:

(सचिवशंसितम् ॥)

जेतारं दशकन्धरस्य जितवान् + तोषाय वर्तिष्यते ॥

Colophon: (Sheet No. 71)

षष्ठोऽङ्कः ॥

Subject: Anargharāghava. 1-7 acts.

Remarks:—The Ms. is in a fairly good condition. Wants beginning and end.

॥ अनर्घराघवनाटकश्लोकाः ॥

4254. ANARGHARĀGHAVANĀṬAKAŚLOKĀḤ.

Burnell's Catalogue No. 10577. Page 171, Right column. Substance—Palm leaf. Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—22 (घ-म). Lines—9 to a Page. Script—Grantha. No. of Granthas—900. Author—Murāri. Complete.

Beginning—Same as No. 4247.

End—Same as No. 4248.

Colophon:

सप्तमोऽङ्कः ॥

Subject: Anargharāghavanāṭaka ślokas 1-416 ślokas

Remarks:—The Ms. is in decaying condition.

॥ अनर्घराघवनाटकम् ॥

4255. ANARGHARĀGHAVANĀṬAKAM.

J. L. Collection No. 605. Substance—Paper. Size—9½ × 4 inches. Sheets—102. Lines—10 to a page. Script—Devanāgarī. No. of Granthas—2300. Author—Murāri. Complete.

Beginning and subject—Same as No. 4247.

End—Same as No. 4248.

Colophon:

समाप्ता अनर्घराघवं नाम नाटककृतिः महाकवेर्मौद्गल्यायनस्य श्रीमन्महोपाध्यायवर्धमाननन्दनस्य मुरारेः ॥ श्रीरस्तु ॥

प्रमाथिनामसंवत्सरे दक्षिणायने भाद्रपदमासे शुक्लपक्षे चतुर्दश्यां तिथौ गुरुवासरे तद्दिने इदं पुस्तकं नारायणभट्टेन लिखितम् ॥

यादृशं + न विद्यते ॥

इदं पुस्तकं वृकोपनामक गङ्गाधरदीक्षितस्येति ज्ञेयम् ॥

Remarks:—The Ms. is in good condition. The Ms. was copied by Nārāyaṇabhaṭṭa in the cyclic year Pramāthin, Dakṣiṇāyana, Bhādrapada month, bright fortnight, 14th day and Thursday.

॥ अनर्घराघवनाटकम् ॥

4256. ANARGHARĀGHAVANĀṬAKAM.

Burnell's Catalogue No. 10663. Page 171, Right column. Substance—Palm leaf. Size—18 × 1½ inches. Leaves—57. Lines—7 to a Page. Script—Grantha. No. of Granthas—1800. Author—Murāri. Incomplete.

Beginning—Same as No. 4247.

End—The Ms. abruptly breaks off in the middle of the last act.

Colophon: Nil.

Subject—Same as No. 4247.

Remarks:—The Ms. is in good condition. The ends of certain leaves are injured.

॥ अनर्घराघवनाटकम् ॥

4257. ANARGHARĀGHAVANĀṬAKAM.

Burnell's Catalogue No. 5155. Page 171. Right column. Substance—Paper. Size—10½ × 5 inches. Sheets—88. Lines—8-9 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Murāri. Incomplete.

Beginning—Same as No. 4247.

End—Breaks off abruptly in the middle of the sixth act (20th stanza.)

Remarks: —The Ms. is in good condition.

॥ अनर्घराघवनाटकम् ॥

4258. ANARGHARĀGHAVANĀṬAKAM.

J. L. Collection No. 606. Substance—Paper. Size—10 × 4¾ inches. Sheets—13. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Murāri. Incomplete.

Beginning—The Ms. begins with the second act.

End—Breaks off in middle of the same act.

Colophon: Nil.

Remarks:—The Ms. is in a fairly good condition.

॥ अनर्घराघवनाटकव्याख्यानम् ॥

4259. ANARGHARĀGHAVANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 5157. Page 171, Right column.

Substance—Paper. Size—$11\frac{1}{10} \times 4\frac{1}{10}$ inches. Sheets—202. Lines—8 to 12 to a Page. Script—Devanāgarī. No. of Granthas—5018. Author—Rucipati. Complete.

Beginning:

श्रीगणेशाय नमः ॥

सुन्दरीशङ्कराभ्यां नमः ।

दोर्दण्डद्वितयेन खण्डपरशोः कोदण्डमारोपयन्
कुर्वाणः सहसा विदेहनृपतिं पूर्णप्रतिज्ञाभरम् ।
सानन्दं कुशिकात्मजेन सुदृशां वृन्देन कौतूहलात्
सव्रीडं प्रियया विलोकितमुखो रामोऽस्तु नः श्रेयसे ॥ १ ॥

अभूदभूतप्रतिपक्षभीतिः
सदा समासादितभूरिनीतिः ।
चिरं कृतार्थीकृतभूमिसूरि-
स्फुरत्प्रतापो नरसिंहदेवः ॥ २ ॥

सूनुस्तस्य वसुन्धरापरिवृढस्यानन्दकन्दक्षिते-
राधारो जगतामशेषविदुषां विश्रामकल्पद्रुमः ।
दाने कर्णकथावलेपनिपुणः संसाररत्नाङ्कुरो
भूपीपालशिरोमणिर्विजयते श्रीभैरवेन्द्रो नृपः ॥ ३ ॥

सौवालवंशजातः तस्यां देशान्महीशस्य ।
श्रीरुचिपतिरतिगूढं स्पष्टीकुरुते मुरारिवचः ॥ ६ ॥

* * *

इह खलु सकलपदार्थजातेषु स्वेष्टसाधनताज्ञानादेव प्रेक्षावत्प्रवृत्तिर्दृश्यते । तदुक्तं न्यायकुसुमाञ्जलावाचार्यपादैः । "तदज्ञानं विषयः तस्य विधिः" इति । तत्र च प्रयोजनाकांक्षायां "निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्" । विदतीति सरस्वतीकण्ठाभरणे भोजराजेन "धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च । करोति प्रीतिं कीर्तिञ्च साधुकाव्यनिषेवणम्" इति ।

* * *

निःप्रत्यूह इति ॥ भगवतो लोचने चक्षुषी उपास्महे आराधयाम इति संबन्धः । यत्तु लोचने इत्यस्य ते इत्यपेक्षितं यत्पदाकांक्षितत्वादिति तन्न । उत्तरत्र वाक्यार्थगतत्वेनोपात्तेन यच्छब्देन पूर्ववाक्यार्थगततच्छब्दानपेक्षणात् । ननु किमर्थमियमुपासना क्रियत इत्यत आह । निःप्रत्यूहमिति ॥

End:

दोषाकरं समवधीर्य गुणानशेषा-
नाशु प्रकाशयति सूर इवांशुराशीन् ।
यस्तं.... प्रणिहितोञ्जलिरेष नित्य-
मालोकनान्मम कृतेर्मुदमादधातु ॥

Colophon:

इति समस्तप्रक्रियाविराजमानहरिनामणपदमलङ्क... श्रीमन्नैरथालिं-

हृदेवनिवेशप्रोत्साहितवैजोलीग्रामनिवासस्य रुचौवालकुलो-
द्भवश्रीरुचिपतिमहोपाध्यायविरचितायां अनर्घराघवटीका-
यां सप्तमोङ्कः ।

शुभमस्तु । कल्याणमस्तु । श्रीकृष्णाय नमः ।

परब्रह्मगोविन्दजि उसहाइ ॥

Subject: Anargharāghavanāṭakavyākhyā. 1-7 Aṅkas. Complete.

Remarks:—The Ms. is in good condition.

The author of this commentary, Rucipati, belonged to Vaijoḷi Grāma and wrote this at the request of one Bhairavasimha, son of Narasimha. This commentary is available in print, in the Nirṇayasāgara Edition.

॥ अनर्घराघवनाटकव्याख्यानम् ॥

4260. ANARGHARĀGHAVANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 5158. Page 171. Right column. Substance—Paper. Size—$11\frac{1}{2} \times 5\frac{1}{2}$ inches. Sheets—104. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—2700. Author—Rucipati. Incomplete.

Beginning—Same as No. 4259.

End:

मुनिरपीति । एतां जगत्त्रयीं रघुपतिगुणक्रीताम् । रघु-
पतिः रामः, तस्य गुणेन क्रीतामवेहि जानीहि । "क्रीता-
त्करणपूर्वात्" इति ङीप् । कुतः मुनिरपि विश्वामित्रोऽपि
दिव्यास्त्राणां गुरुः उपदेष्टा बभूव । दिवौकसां देवानां

अजगवधनुर्भङ्गे पिनाकनाषकहरधनुर्भङ्गे तावानेव महो-
त्सवः मनुष्यभवे यादृश उत्सव................ ॥

Colophon: (Sheet No. 97)

इति वैजोळीग्रामवास्तव्यखोवाळवंशप्रभवश्रीरुचिपतिमहोपाध्या
यविरचितायामनर्घराघवटीकायां तृतीयोङ्कः ॥

Subject: Anargharāghavanāṭakavyākhyānam. 1-4 Aṅkas. Fourth incomplete.

Remarks:—The Ms. is in a good condition.

॥ अनर्घराघवनाटकव्याख्यानम् ॥

4261. ANARGHARĀGHAVANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 5352. Page 56. Right column.
Substance—Paper. Size—14×6 inches. Sheets—83. Lines—14 to a Page. Script—Devanāgarī. No of Granthas—1600. Author—Rucipati. Incomplete.

Beginning—Same as No. 4259.

End:

पुण्यं च तत् अहश्चेति कर्मधारयः । पुण्याहं रक्षोमरण-
दीनं पुण्यसुदिनाख्यामहः क्लीबतेष्टा । तत्र मंगलं शुभ-
कर्म आदधातु न केवलं यां कामयितु(?) भूमिमात्रमपीत्यपे-
रर्थः । यद्वा पुण्याहं जन्मदिनं सुखरात्रिपूत्सवदिनं तत्र
मङ्गलं यत्क्रियते तत्पुण्याहमङ्गलपदेनोच्यते । यस्य च
तत् क्रियते.................................. ॥

Colophon: (Sheet No. 23.)

इति श्रीरुचिपतिमहोपाध्यायाविरचितायां अनर्घराघवटीकायां
प्रथमोऽङ्कः ॥

Subject: Anargharāghavanāṭakavyākhyānam 1-2 Aṅkas 2nd Incomplete.

Remarks:—The Ms. is in excellent condition. Dr. Burnell has mistaken this for a copy of the Pratāparudrīya and hence has put it under that heading on page 56.

॥ अनर्घराघवनाटकव्याख्या ॥

4262. ANARGHARĀGHAVANĀṬAKAVYĀKHYĀ.

J. L. Collection No. 607. Substance—Paper. Size—12×5 inches. Sheets—17. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Rucipati. Incomplete.

Beginning—Same as No. 4259.

End:

पुरा किल त्रिशङ्कुः क्षत्रियो राजा स्वदेहेन स्वर्गं गन्तुकाम इष्टिं कर्तुं वसिष्ठं ……………

Subject: Anargharāghavavyākhyā.

Remarks:—The Ms. is in a fairly good condition.

॥ अनर्घराघवनाटकव्याख्यानम् ॥

4263. ANARGHARĀGHAVANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 10664, Page 171. Right column. Substance—Palm leaf. Size—16½×1 inches. Leaves—183+3=186. Lines—6 to a Page. Script—Telugu. No. of Granthas—3400. Author—Harihara. Complete.

Beginning:

(अन्योन्यव्यस्तसामान्य स)भावेशनिदर्शनम् ।

अव्याजभक्तिसुलभमव्यादिभमुखं महः ॥ १ ॥

ऐश्वर्येहावभैर्नित्यं नमो वाग्वोदभिः सुरैः ।
वन्दनीयां भजे वाणीं स्वाभीष्टफलसिद्धये ॥ २ ॥

वाग्मकन्दर्पयाचार्यं वन्दे यस्य कृपावशात् ।
अपि बालाः प्रगल्भन्ते वैदुष्योत्कर्षशालिनः ॥ ३ ॥

अस्ति शब्दे द्विमीमांस्यां प्रमाणे च कृतश्रमः ।
भारद्वाजो नृसिंहार्युसुतो हरिहरः सुधीः ॥ ४ ॥

व्युत्पन्नशब्दः प्रथितो यत्र व्युत्पन्नतामगात् ।
सोऽयं हरिहरः प्राह टीकामानर्घराघवीम् ॥ ५ ॥

इह खलु मुरारिरिति प्रसिद्धो महाकविर्नाटकरूपप्रबन्धनिर्माणव्याजेन सकलपुरुषार्थसाधनं रामचन्द्रचिन्तनमभिसन्धाय प्रारीप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिमभिलषन् "आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम्" इत्यालङ्कारिकीं मर्यादामनुसृत्य समुचितेष्टदेवतोपास्तिप्रतिपादनपरां नान्दीं प्रबध्नाति ॥ निष्प्रत्यूहमित्यादि ॥

End :

मधुस्यन्द इत्यनेन तस्य स्वहृदयानन्दजनकतया निर्दोषत्वम् । शब्दार्थालङ्कारवत्ता च दर्शिता । तेन सगुणौ सालङ्कारौ निष्ठा च शब्दार्थदर्शितौ तयोरेव काव्यत्वात् । एतेन प्रकृतौ काव्यमित्युक्तं भवति तज्जागर्तु अविरामेण प्रकाशताम् ।

Colophon :

नायकानन्दो नाम सप्तमोऽङ्कः ।

बोम्मगण्डप्पयाचार्य शिष्यो (हरि)हराभिधः ।
अनर्घराघवस्येमां व्याख्यामरचयत्सुधीः ॥

ये शब्दशास्त्रे निष्णाताः ये शीलितनिघण्टवः ।
तेषामेवाधिकारोऽस्य ग्रन्थस्य परिशोधने ॥

बिन्दुदुर्लिपि + समीक्ष्य सज्जनाः ॥

मुरारिनाटकस्येमां टीकां हरिहररचिताम् ।
रामभट्टाभिधः क्षिप्रं लिलेख विरळं कलम् ॥

Subject: Anargharāghavanāṭakavyākhyānam. 1-7 Aṅkas. Complete.

Remarks:—The Ms. is in a fairly good condition.

The author of this commentary is one Harihara, pupil of one Bomma Gaṇḍappācārya and son of Nṛsimhārya of Bhāradvāja gotra. The present Ms. was copied by Rāmabhaṭṭa.

॥ अनर्घराघवनाटकव्याख्यानम् ॥

4264. ANARGHARĀGHAVANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 10665 a. Page 171. Right column.

Substance—Palm leaf. Size—17¾ × 1⅝ inches. Leaves—106 (1-106). Lines—8 to a Page. Script—Grantha. No. of Granthas—3400. Author—Harihara. Complete.

Beginning, end, colophon and subject—Same as No. 4263.

Remarks:—The Ms. is old and is in fairly good condition. This is the original of No. 4263.

The other works contained herein are:—

1. Anargharāghavavyākhyā.
2. Kāvyādarśa.

॥ अनर्घराघवनाटकव्याख्या ॥

4265. ANARGHARĀGHAVANĀṬAKAVYĀKHYĀ.

J. L. Collection No. 608. Substance—Paper. Size—12 × 4½ inches. Sheets—208 (1-77 & 1-131). Lines—8 to 9 to a Page. Script—Devanāgarī. No. of Granthas—3400. Author—Harihara. Complete.

Beginning, end, colophon and subject—Same as No. 4263.

Remarks:—The Ms. is in a fairly good condition.

॥ अनर्घराघवनाटकव्याख्या ॥

4266. ANARGHARĀGHAVANĀṬAKAVYĀKHYĀ.

S. S. Collection No. 195. Substance—Palm leaf. Size—16¾ × 1½ inches. Leaves—84. Lines—8-11 to a Page. Script—Grantha. No. of Granthas—3400. Author—Harihara. Complete.

Beginning, end, colophon and subject—Same as No. 4263.

Remarks:—The Ms. is in a decaying condition.

॥ अनर्घराघवनाटकव्याख्यानम् ॥

4267. ANARGHARĀGHAVANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 5318. Page 171. Right column.

Substance—Paper. Size—13×6¾ inches. Sheets—88. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—825. Author—Harihara. Incomplete.

Beginning—Same as No. 4263.

End:

इको गुणवृद्धिसूत्रे महाभाष्यकारैरन्यदेवेदं परिभाषान्तरमिति प्रयुक्तत्वादप्यन्यशब्दान्तरशब्दयोरन्यतरस्य वैयर्थ्यमिति कुचोद्यं निरस्तमिति वेदितव्यम् । केवलस्वभावस्यैव प्रयोजकत्वे दृष्टान्तमाह— कुमुदबन्धुरिति ॥ यदिति तृतीयार्थेऽव्ययम् । येन स्वभावमात्रेण...... ॥

Colophon: Nil.

Subject: Anargharāghavanāṭakavyākhyānam.

Remarks:—The Ms. is in excellent condition.

॥ अनर्घराघवनाटकव्याख्यानम् ॥

4268. ANARGHARĀGHAVANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 10665 b. Page 171. Right column.

Substance—Palm leaf. Size—18½×1 inches. Leaves—52 (1-52). Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—1870. Author—Kṛṣṇa. Complete.

Beginning:

हरिः ओं ॥

नमस्तस्मै भगवते लक्ष्मीनारायणात्मने ।
प्रपञ्चपरिणामस्य मूलभूताय हेतवे ॥ १ ॥

सन्तो न गणयन्त्येव सन्तो दोषान्स्वभावतः ।
असन्तस्त्वसतो दोषानध्यारोप्य वदन्ति च ॥ २ ॥

इत्थं मय्यसहायेऽत्र (ग्रन्थ ?) दोषपरीक्षणे ।
त्वमेव वेत्ता नितरां सावधानः सदा भव ॥ ३ ॥

सूक्तिरत्नावळी यस्य गौडीसत्कर्णभूषणम् ।
वाल्मीकीयामाह्वयते वैदर्भी सूक्तिमौक्तिकीम् ॥ ४ ॥

अनर्घराघवे यस्य मुरारेर्नाटकोत्तमे ।
पदवाक्यार्थभावानां व्याक्रिया क्रियते मया ॥ ५ ॥

आरीप्सितस्य प्रबन्धस्य विघ्नशान्त्यर्थं पूर्वरङ्गे प्रधानभूतां नान्दीं शंसति ॥ निष्प्रत्यूहमिति ॥ अयमत्र "पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते । प्रविश्य तद्वदपरः काव्यार्थं सावयेन्नटः ॥" इति हि नाटकारम्भः । पूर्वरङ्गो नाम कथासूचकः प्रथमप्रयोगः । तस्याङ्गानि प्रत्याहारावतरणोत्थापपरिवर्तननान्दीप्रभृतीनि । तेषु नान्दीप्रधानभूतावश्यं कर्तव्या । तदुक्तम्— "यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके । तथाप्यवश्यकर्तव्या नान्दी विघ्नप्रशान्तये ॥" इति ॥

* * *

सपत्नीकृतः सदृशीकृतः सदृशोऽस्मात्सापत्न्यात् गुणवादः । एतदुक्तं भवति नाभीसरसिजस्य..................सूर्यचन्द्रात्मकतया यथास्थानं विकाससंकोचौ कुर्वती भगवतो

लोचने प्रत्यूहाभावाय तमुपास्महे इति कौमोदकीलक्ष्मेति भगवन्नामधेयोपादानमस्य नाटकस्य वीररसप्रायत्वं सूचयतीति केचिदुपादिशन्ति ॥ इष्टदेवतां नमस्करोति ॥ विरमतीति ॥

End:

मकरन्दशब्देन शृङ्गारादयो लक्ष्यन्ते । शब्दब्रह्माख्यं परि···मळमिति व्याकरतात्पर्येणोक्तम् । गङ्गेति एव.... स्रोतसो रूपाणि ब्रह्मणः कमण्डलुजलस्रोतांसि । मन्दाकिनी वियद्गङ्गा । भोगवती पाताळगंगा । एतदन्यानि एतत्स्वरूपाणि । त्रिलोकी लोकत्रयम् । श्रुतिशष्कुलीवलयितस्यामवगाही कर्णगोळकावच्छिन्नाकाशाश्रयः शब्दरूप इत्यर्थः । कवीनां वीरयशोरसायनमधुरस्यन्दः । कवीनां काव्यपित्यर्थः । जागर्तु प्रकाशताम् ॥

Colophon:

इति मुरारिव्याख्या परिसमाप्ता ॥

इति काश्यपगोत्रजस्य वरदराजसूरेः सूनुना कृष्णेन विरचिते मुरारिव्याकरणे प्रथमोऽङ्कः ॥

Subject: Anargharāghavanāṭakavyākhyānam 1-7 Acts. Complete.

Remarks:—The Ms. is in a fairly good condition.

For other works contained herein see No. 4264.

The author of this commentary, Kṛṣṇa was the son of one Varadarājasūri and belonged to the Kāśyapagotra.

॥ अनर्घराघवनाटकव्याख्या ॥

4269. ANARGHARĀGHAVANĀṬAKAVYĀKHYĀ.

J. L. Collection No. 609. Substance—Paper. Size—12 × 4¾ inches. Sheets—257 (1-68, 2-46, 3-48, 1-60 & 1-85). Lines—16 to a Page. Script—Devanāgarī. No. of Granthas—7700. Author—Rāmānandāśramin. Incomplete.

Beginning:

श्रीगणेशाय नमः ॥

ॐकारार्थाय विज्ञानदायिने लोकसाक्षिणे ।
करुणामयचीशाय दक्षिणामूर्तये नमः ॥

अस्त्यान्ध्रदेशे चरकूरिवंशः
कृष्णातटे काश्यपगोत्ररूढः ।
यो बहृचानां बहुमाननीयो
धत्ते सदा कीर्तिसुवैजयन्तीम् ॥

तत्रोदभूत्तिम्मयसोमयाजी
बुधोऽष्टभाषाकविपद्मबन्धः ।
नित्यान्नदाता निजभक्तिलब्ध-
वृषाकपायीरमणप्रसादः ॥

तस्मादभूद्बहृचचक्रवर्ती
यज्ञेश्वरः पण्डितसार्वभौमः ।
सर्वाम्बिका सर्वगुणोपपन्ना
तस्य द्वितीया भवदम्बिकाम्बा ॥ ४ ॥

शाम्भवाद्भवत्पुत्राश्चत्वारः श्रीनिकेतनाः ।
विधिमन्त्रार्थनिपुणाश्चत्वारो निगमा इव ॥ ५ ॥

षड्दर्शनीतत्त्वविवेककर्ता
स्वशिष्यसम्पादितदिग्जयश्रीः ।
तेष्वादिमः पण्डितपट्टबन्धः
श्रीकोण्डभट्टो जयतीह लोके ॥ ६ ॥

लक्ष्मीधरस्तदनुजो दक्षिणामूर्तिकिङ्करः ।
सर्वविद्वत्कविमतः जयति क्ष्मातले सुधीः ॥ ७ ॥

स गार्हस्थ्ये चिरं स्थित्वा जित्वा सर्वदिशः सुधीः ।
संन्यस्याजनि योगीन्द्रो रामानन्दाश्रमाभिधः ॥ ८ ॥

जगत्प्राणास्वादी प्रतिदिनमधस्तात्सम्पुषितः
सदा रन्ध्रान्वेषी कुटिलतमवृत्तेन सहितः ।
द्विजिह्वानां वश्यः परुषविषसंस्पृष्टवचनः
कथं रामानन्दाश्रममुनितुलामेत्यहिपतिः ॥ ९ ॥

स करोति महायोगी मीमांसाद्वयपारगः ।
अनर्घराघवव्याख्यां प्रीतये विदुषां शुभाम् ॥ १० ॥

प्रमादादन्यथाबोधादज्ञानाद्वा विलिख्यते ।
यदत्र तन्मया सद्भिः क्षन्तव्यं कृपया मयि ॥ ११ ॥

अथ तत्र भवान्मुरारिर्नाम महाकविः प्रसिद्धकविसार्व-
भौमः सकलतन्त्रस्वतन्त्रः सङ्गीतसाहित्यसारस्य पारदृश्वा

नाटकनामधेयरूपकनिरूपणापदेशेन सकलपुरुषार्थसम्पादनसन्तानायमानमनन्तातनयानयनचकोरिकाचन्द्रायमचन्द्रचरितगुणवर्णनं मनसि निधाय चिकीर्षितस्य नाटकप्रबन्धस्याविघ्नपरिसमाप्तिप्रचयगमनयाशासानः * *
नाटकादौ कर्तव्यां पूर्वरङ्गप्रसाधनाङ्गभूतां नान्दीमाचरति ॥ निष्प्रत्यूहमिति ॥

End:

॥ निष्क्रान्तावितिं ॥ अङ्कत्वञ्चास्य प्रत्यक्षरामरूपनेतृचरितत्वाद्वालिवधार्थेनावान्तरार्थत्वेन व्यवहितस्य सीतानयनरूपप्रकृतार्थस्य सीतादेव्याः प्रवृत्तिमन्वेष्टुमित्यनेन बिन्दुना व्यक्तीभूतेन सहितत्वात् वालिवधनिमित्तकल्पनादिनानाविधसंविधानवीररौद्रकरुणशृङ्गाररूपनानारसाश्रयत्वाच्चावगन्तव्यम् । तदुक्तम् । "प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरःसरः । अङ्को नानाप्रकारार्थसंविधानरसाश्रयः" इति ॥ भद्रम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यकृष्णाश्रमपादशिष्यरामानन्दाश्रममुनिविरचितायामनर्घराघवव्याख्यायां इष्टार्थकल्पवल्लरीसमाख्यायां पञ्चमोऽङ्कः ॥ श्रीशिवार्पणमस्तु ॥ श्रीहालास्यपतये नमः । विकृतिसंवत्सरे माघमासे कृष्णपक्षे अमायामिष्टार्थकल्पवल्लरीसमाख्यानर्घराघवनाटकटीकायाः पञ्चमोऽयमङ्कः पूर्णतामाप ॥

Subject: Anargharāghavavyākhyā, otherwise known as Iṣṭārthakalpavallarī. 1-5 acts.

Remarks :—The Ms. is in a fairly good condition.

The author was a Telugu Brahmin living on the banks of the Kṛṣṇā, in the district of Kṛṣṇa. He belonged to the Kāśyapagotra and the Ṛk śākhā. The family name of this author was Carakūri. The following particulars could be gathered of his ancestry—In the Carakūri family there was one Timma Somayājin who was master of eight languages and had a title to that effect. He had a son by name Yajñeśvara. This Yagñeśvara married one Sarvāmbikā and they had four sons born to them. The eldest was Koṇḍubhaṭṭa, the author of a work called Ṣaḍdarśanītattvaviveka. The second was Lakṣmīdhara, who later on became a sanyāsin, under the name of Rāmānandāśrama and he is the author of the present commentary. .

॥ अभिज्ञानशाकुन्तलम् ॥

4270. ABHIJÑĀNAŚĀKUNTALAM.

Burnell's Catalogue No. 5136. Page 173. Left column.

Substance—Paper. Size—$9\frac{1}{2}\times4$ inches. Sheets—56. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1189. Author—Kālidāsa. Complete.

Beginning:

श्रीगणाधिपतये नमः ।

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुस्सर्वभूतप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥ १ ॥

नान्द्यन्ते

सूत्रधारः । नेपथ्याभिमुखमवलोक्य, आर्ये यदि नेपथ्यविधानमवसितं तर्हि इतस्तावदागम्यताम् ।

* * *

सूत्रधारः । आर्ये साधु गीतम् । अहो रागबद्धचित्तवृत्तिः आलिखित इव सर्वतो रङ्गः । तदिदानीं कतमत्प्रयोगमाश्रित्यैनामाराधयामः ।

नटी णं अज्जमिस्से हिं पढमं एव्व आणत्तं । अवि (हि)ण्णाणसाउंदळं नाम अउव्वं णाडअं पओए अहीकरीअदुत्ति ॥

End:

तर्हीदमस्तु भरतवाक्यम्—

प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतमहिता महीयसाम् ।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः ॥ ३५ ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon:

सप्तमोङ्कः । विश्वावसुनामके संवति कोलग्रामे श्रीपतिना लिखितेयं शकुन्तळा ॥

Subject: Śākuntalanāṭaka. 1-7 Aṅkas.

Remarks:—The Ms. is in a fairly good condition.

No remarks are necessary regarding Kālidāsa. For the latest information regarding his birth and nativity, please refer

to the "Birthplace of Kālidāsa" by Mr. Lachmi Dhar, published by the Delhi University and the article on the date of Kālidāsa in the "Allahabad University Studies" Vol. V by Kṣetreścandra Cattopādhyāya of the Allahabad University. Referance may also be made to Dr. Keith's "Sanskrit Drama". Several editions of the Śākuntala are available. The Śrī Vāṇī Vilās Press edition is the best one.

There are several copies of the Śākuntala in this library and they are tabulated in the following pages.

Descriptive No.	Collection No.	Substance	Size inches	No. of Sheets or leaves.
4271	B. L. 5137	Paper.	$9\frac{3}{10} \times 4\frac{4}{5}$	81
4272	„ 5138	do.	$11\frac{1}{2} \times 4\frac{4}{5}$	88
4273	„ 5139	do.	$10\frac{3}{8} \times 4\frac{1}{2}$	76
4274	„ 5140	do.	$11\frac{1}{4} \times 4\frac{1}{8}$	59
4275	„ 5141	do.	$9\frac{3}{4} \times 4\frac{9}{10}$	69
4276	„ 5143 and Ms. 14667	do.	$10\frac{1}{8} \times 6$	50
4277	„ 5310	do.	$13\frac{4}{5} \times 5\frac{3}{5}$	60
4278	„ 10563	Palm leaf.	$17 \times 1\frac{1}{5}$	70
4279	„ 10564	do.	$13\frac{1}{4} \times 1\frac{1}{4}$	62
4280	„ 10565	do.	$15\frac{1}{4} \times 1\frac{1}{5}$	45
4281	„ 10566	bo.	$16 \times 1\frac{1}{2}$	46
4282	„ 10567	do.	$17\frac{4}{5} \times 1\frac{3}{10}$	52
4283	„ 10568	do.	$16\frac{1}{4} \times 1\frac{1}{8}$	52
4284	„ 10569	do.	$8\frac{1}{2} \times 1\frac{1}{2}$	65
4285	„ 10572	do.	$14\frac{1}{2} \times 1\frac{1}{4}$	46
4286	J. L. 610	Paper.	$9\frac{1}{2} \times 4$	71
4287	T. S. 718	do.	$9\frac{1}{2} \times 4\frac{1}{4}$	80
4288	„ 719	do.	$8\frac{1}{2} \times 4$	52
4289	S. S. 193	Palm leaf	$9\frac{1}{2} \times 1\frac{1}{4}$	54
4290	M. S. 14668 & 5146	Paper.	$9\frac{1}{4} \times 4$	42
4291	„ 5144	do.	$7\frac{9}{10} \times 4\frac{3}{5}$	46
4292	T. S. 720	do.	$11 \times 4\frac{1}{2}$	41
4293	B. L. 5142	do.	$10\frac{1}{4} \times 8\frac{9}{10}$	54

No. of Lines per Page or Sheet.	Script	Complete or otherwise.
9-11	Devanāgarī	Complete.
11	do.	„
9	do.	„
8	do.	„
10	do	„
12	do.	„
10	do.	„
5	Grantha.	„
8	do.	„
8	do.	„
9	do.	„
7	do.	„
5-7	do.	„
9 or 10	do.	„
8-9	do.	„
10	Devanāgarī.	„
9 or 10	do.	„
8-10	do.	„
9	Malayālam.	„
8	Devanāgarī.	Incomplete. (1-6 Acts wants end)
12	do,	„ (1-7 Acts wants two sheets in the middle.)
11	do.	„ (1-7 Acts same sheets are missing in the 1st Act.)
	do,	„(1-4 Acts wants end)

Descriptive No.	Collection No.	Substance	Size inches	No. of sheets or leaves
4294	B. L. 5148	Paper.	8×5	36
4295	J. L. 611	do.	10×5	22
4296	B. L. 10570	Palm leaf.	$7\frac{3}{8} \times 1\frac{1}{2}$	35
4297	S. K. 214	Paper.	$11\frac{1}{4} \times 4\frac{1}{2}$	17
4298	B. L. 5147	do.	$10\frac{1}{4} \times 4$	18
4299	„ 10571	Palm leaf.	$17\frac{1}{8} \times 1\frac{1}{2}$	7
4300	„ 5145	Paper.	$10 \times 4\frac{2}{10}$	6
4301	J. L. 612	do.	$10 \times 4\frac{1}{2}$	27
4302	T. S. 737 c	do.	$7 \times 4\frac{1}{4}$	7

No. of Lines per Page or Sheet.	Script	Complete or otherwise.
11	Devanāgarī.	„ (1-4 Acts)
13	do.	„ (1-4 Acts wants end)
9	Telugu.	„ „
9-11	Devanāgarī.	„ (1-3 Acts wants end)
7	do.	„ (1st Act wants end)
8-10	Grantha.	„ (1-2 Acts wants end)
11	Devanāgarī.	„ (1st Act wants end)
12	do.	„ (3-6 Acts wants beginning)
13	do.	„ (3rd Act wants beginning)

॥ अभिज्ञानशाकुन्तलव्याख्यानम् ॥

4303. ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM.

Burnell's Catalogue No. 10573. Page 173. Right column. Substance—Palm leaf. Size—17⅜×1 inches. Leaves—63 (4-66). Lines—7 to a Page. Script—Grantha. No. of Granthas—1800. Author—Kāṭayavemabhūpaḥ. Complete. (wants beginning).

Beginning:

(आर्यमिश्रैः प्रथममेवाज्ञप्तम्—) अभिज्ञानशाकुन्तळं नामापूर्वं नाटकं प्रयोगेणालङ्क्रियतामिति । प्रयोगेण (अभिनयेन अलङ्क्रियतां भूष्यतां प्रकटीक्रियतां इति) शाकुन्तळं शकुन्तळामधिकृत्य कृतम् । "अधिकृते ग्रन्थे" इत्यणप्रत्ययः । अभिज्ञानप्रधानं शाकुन्तळं अभिज्ञानशाकुन्तळम्, शाकपार्थिवादित्वात्समासः ॥

End:

प्रवर्ततामित्यादि ॥ पार्थिवः राजा । जातावेकवचनम् । प्रकृतिहिताय प्रकृतीनां प्रजानां हिताय इष्टाचरणाय प्रवर्ततां प्रयततां * *

आत्मभूः स्वयंभूः परमेश्वर इत्यर्थः । ममापि पुनर्भवं पुनर्जन्म क्षपयतु अपाकरोतु । अत्र भरतः नाट्यार्थस्य परिसमाप्तत्वादनु....त्वमुत्सृज्याशिषं प्रत्युक्तवानित्यनुसन्धेयम् । अत्र शुभशंसनात्प्रशस्तिर्नाम सन्ध्यङ्गमुक्तं भवति । यथो-

कम्— " प्रशस्तिश्शुभशंसनम् " इति ।

इति निष्क्रान्ताः सर्वे ॥

Colophon:

इति श्रीकाटयवेमभूपविरचिते कुमारगिरिराजीये शाकुन्तल-
व्याख्याने सप्तमोऽङ्कः । शाकुन्तलटीका समाप्ता ॥

Subject: Abhijñānaśākuntalanāṭakavyākhyāna. 1-7 Acts.
Wants beginning only.

Remarks:—The Ms. is in a fairly good condition.

॥ अभिज्ञानशाकुन्तलनाटकव्याख्यानम् ॥

4304. ABHIJÑĀNAŚĀKUNTALANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 10574. Page 173. Right column.
Substance—Palm leaf. Size —$16\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—65 (4–68). Lines—7 to a Page. Script—Grantha. No. of Granthas—1800. Author—Kāṭayavemabhūpa. Complete. (wants beginning)

Beginning, end, colophon and subject—Same as No. 4303.

Remarks: —The Ms. is in a fairly good condition. Last three leaves are eaten away at the right end.

॥ अभिज्ञानशाकुन्तलनाटकव्याख्यानम् ॥

4305. ABHIJÑĀNAŚĀKUNTALANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 10575. Page 173. Right column.

Substance—Palm Leaf. Size—14×1⅞ inches. Leaves—77. Lines—7 to a Page. Script—Grantha. No. of Granthas—1600. Author—Kāṭayavemabhūpa. Incomplete. 1-6 Acts.

Beginning:

वेदानीनां विशुद्धानां विद्यानां जन्महेतवे ।
पार्वतीपरतन्त्राय परस्मै वस्तुने नमः ॥

Same as No. 4306.

End:

अस्मात्परमित्यादि ॥ धौताश्रुशेषं धौतं अश्रु येन तत्तथोक्तम् । तस्मादुदकाच्छेषं अवशिष्टम् ॥ अस्ससदु भट्टा । आश्वसतु भर्ता ॥ २॥ विज्झन्तंमि दीवे ववआणदोसेण एसो अन्धआरं अणुहोदि । विद्यमानोऽपि दीपे व्यवधानदोषेण एषोन्धकारमनुभवाति । अहं दाणिं एत्थ णं णिव्वुदं करिस्सं । अहव(ा) सुदं मए ॥

Colophon: (Leaf No. 188).

इति श्रीकाटयवेमभूपालविरचिते कुमारगिरिराजीये
शाकुन्तलव्याख्याने पञ्चमोङ्कः ॥

Subject: Abhijñānaśākuntalanāṭakavyākhyāna 1-6 Acts. 6th Incomplete.

Remarks:—The Ms. is in a fairly good condition.

॥ अभिज्ञानशाकुन्तलनाटकव्याख्यानम् ॥

4306. ABHIJÑĀNAŚĀKUNTALANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 5149. Page 173. Right column.

Substance—Paper. Size—$10\frac{3}{16} \times 5\frac{3}{16}$ inches. Sheets—82. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—Kāṭayavema. Incomplete.

Beginning:

श्रीगणेशायनमः ॥

वागर्थाविव + पार्वतीपरमेश्वरौ ॥ १ ॥

चतुर्दशविधानां च विद्यानां जन्महेतवे ।
पार्वतीपरतन्त्राय परस्मै वस्तुने नमः ॥ २ ॥

कीर्तिप्रतापसौभाग्यत्यागभोगविभूषितः ।
एक एव बहुश्लाघ्यः कुमारगिरिजो नृपः ॥ ३ ॥

मुनिनां भरतादीनां भोजादीनां च भूभुजाम् ।
शास्त्राणि सम्यगालोच्य नाट्यवेदार्थवेदिनाम् ॥ ४ ॥

प्रोक्तं वसन्तराजेन कुमारगिरिभूभुजा ।
नाम्ना वसन्तराजीयं नाट्यशास्त्रमनुत्तमम् ॥ ५ ॥

तत्रोक्तेनैव मार्गेण दर्शितं नाट्यलक्षणम् ।
कवीनामाश्रयो मन्त्री काटभूपतनूद्भवः ॥ ६ ॥

सोऽयं वेमविभुः कुमारगिरिणा राज्ञा नियुक्तः कृती
नाट्यानां त्रितयं कृतं कृतिविधौ श्रीकाळिदासेन यत् ।
तस्योद्रिक्तमनोभुवस्य रसिकः शाकुन्तलादेः स्वयं
व्याख्यानं कुरुते कुमारगिरिराजीयाख्यमस्मै शुभम् ॥ ७ ॥

अत्र कालिदासकविः प्रारीप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं इष्टदेवतानमस्कारपूर्वकमाशिषं प्रयुङ्क्ते ॥

या सृष्टिरित्यादि ॥ ईशः अवत्विति संबन्धः । कीदृशः शिवः ? प्रत्यक्षाभिरिन्द्रियग्राह्याभिरष्टमूर्तिमद्भिः प्रपन्नः उपेतः । कीदृश्यस्तनवः ? या स्रष्टुर्ब्रह्मणः आद्या प्रधाना सृष्टिः अनेन जलमयी तनुरुक्ता । "अप एव ससर्जादौ" इति विधिस्मरणात् । या विधिहुतं विध्युक्तप्रकारेण दत्तं हविः हव्यं वहति दधाति देवतार्थमिति शेषः । "देवेभ्यो हव्यं वहति" इति श्रुतेः । अनेन अग्निमयी तनुरुक्ता ॥

End:

महाभाग इत्यादि ॥ महाभागो महाभाग्यः । अभिन्नस्थितिः अविहितमर्यादः । "मर्यादा धारणा स्थितिः" इत्यमरः । वर्णानां ब्राह्मणादीनां मध्ये अपकृष्टोऽपि अकिञ्चनोऽपि अपथमार्गं न भजते । सद्योऽपि संसर्गयोग्ययोवे(?) त्यभिप्रायः । तथाप्येवमपि परितः विविक्तेन परिचरिमासे(?) वितमविविक्तं विजनं येन । यथो ... येन मनसा उपलक्षितः । जनाकीर्णं प्रजासंकुलं इदं गृहं हुतवहपरीतमिव अनलाक्रान्तमिव मन्ये प्रवेष्टुं दुस्सहमित्यर्थः ॥ अभ्यक्तमिवेत्यादि ॥ स्पष्टोऽर्थः । अमो किंपिवामेदेरणे अणिवि अरेदि अहो अ......... ॥

Colophon: (Sheet No 66).

इति को(का)टवेमभूपालविरचिते कुमारगिरिराजीये शाकुन्तलव्याख्याने तृतीयोऽङ्कः ॥

Subject: Abhijñānaśākuntalavyākhyāna. 1-5 Acts, 5th

Incomplete.

Remarks :– The Ms. is old and is in a fairly good condition.

॥ अभिज्ञानशाकुन्तलनाटकव्याख्यानम् ॥

4307. ABHIJÑĀNAŚĀKUNTALANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 10576, Page 178. Right colu

Substance—Palm leaf. Size—15×1 inches. Leaves—48. Lines—6 or 7 to a Page. Script—Telugu. No. of Granthas—1300. Author—Kāṭayavemabhūpāla. Incomplete.

Beginning—Same as No. 4306.

End:

याहमस्य प्रत्ययेन मुखमधोः हृदयविषस्य हस्ताभ्यास-

मुपगता । रोदिति रोदनं करोति । .... ॥

Colophon : Nil.

Subject : Abhijñānaśākuntaḷanāṭakavyākhyāna. 1-5 Acts 5th Incomplete.

Remarks :—The Ms. is in a decaying condition.

॥ अभिज्ञानशाकुन्तलनाटकव्याख्यानम् ॥

4308. ABHIJÑĀNAŚĀKUNTALANĀṬAKA-VYĀKHYĀNAM.

Burnell's Catalogue No. 5150. Page 178. Right column.

Substance—Paper. Size—$9\frac{4}{8}\times 5\frac{1}{8}$ inches. Sheets—65. Lines—18 to a Page. Script—Devanāgarī. No. of Gran-

thas—1886. Author—Rāghavaḥ. Incomplete. (1-4 Acts 4th only begins).

Beginning:

श्रीगणेशायनमः ॥

यत्रेधाजनि दशधा द्विधागतं य-
 द्यज्जातं दशविधमेति षोडशत्वम् ।
यद्गीतं सममहदादिकस्य चाद्यं
 तेजस्तज्जयति हिमोष्णरूपमव्ययम् ॥ १ ॥

* * *

वाचिकाद्यभिनयोपमनाद्या-
 चार्यमत्र भरतं मुनिमीडे ।
लास्यताण्डवनियोजनलीला-
 कौशलेन परितोषितभर्गम् ॥ ५ ॥

अथ नाटकादौ पूर्वरङ्गाङ्गभूतामाशीरूपां चतुरस्रता-लानुसारिणीमष्टपदां सूत्रधारो नान्दीं पठति— या सृष्टिरिति । या तनुः स्रष्टुर्ब्रह्मण आद्या सृष्टिः, जल-मित्यर्थः । "अप एव ससर्जादौ तासु वीर्यमपासृजत्" इति स्मरणात् ।

End:

पुष्पोच्चयं रूपयति । पूर्ववत् सखि प्रकृतिवक्रः सः क-स्यानुनयं प्रतिगृह्णाति । किंचित्पुनः सानुक्रोशः सकृपः कृतः । "कृपा दयानुकम्पा स्यादनुक्रोशोऽप्यथोहसः"

इत्यमरः । तस्मि... तदपि कथय यदा निर्वर्तितुं नेच्छ-
ति तदा विज्ञापितो मया । प्रथम इति प्रेक्ष्य विचार्य अत्र
कोपः कर्तुं न... .... ॥

Colophon: (Sheet No. 64)

इत्यर्थद्योतनिकायां शाकुन्तलटीकायां तृतीयोङ्कः समाप्तिमगमत् ॥

Subject : Abhijñānaśākuntalanāṭakavyākhyāna, called Arthadyotanikā 1-4 Acts; 4th only begins.

Remarks:—The Ms. is in good condition.

॥ अभिज्ञानशाकुन्तलव्याख्या ॥

4309. ABHIJÑĀNAŚĀKUNTALA-VYĀKHYĀ.

J. L. Collection No. 618. Substance—Paper. Size—9½×4 inches. Sheets—73. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1800. Author—Ghanaśyāma Complete.

Beginning:

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥

नत्वा नागमुखं मुदं कृतिमयीं कुर्मः परस्मै भुवां
कीर्तिं कुर्मह आत्मनो मनसि नः का भुक्तिमुक्त्योः कथा ।
निर्वाणाय नदीभवच्चातिकृतामस्माकमास्ते शिवो
नारीमूर्तिमयं निलिम्परतये नारायणो वा प्रभुः ॥ १ ॥

* * * *

आत्मा यः शिवयोश्चिदम्बरमहायोगीन्द्रशाकम्भरी
भ्राता श्रीह्रयसुन्दरीकमलजः काशीमहादेवजः ।
मन्त्री चोलमहीभुजोऽतिगरिमा तुकोजिराजस्य यो
नम्रः सप्तदिवावदीति स घनश्यामः कवीनां कविः ॥ ६ ॥

* * * *

लक्ष्मीशो न विकल्पते तदितरः सर्वोच्चमत्वे हरे
गौरीशोऽपि न कल्पते तदितरः सर्वोच्चमत्वे हरौ ।
येरेषां पदरेणवः शिरसि नः सन्त्वत्र बौद्धान्तकृ-
द्गीताभाष्यसहस्रनामविवृती एते प्रमाणं सताम् ॥ ८ ॥

अथैतन्नाटकस्थायिसंविधानावबोधने ।
संक्षेपणेन वस्त्वादिनिर्देशः क्रियतेऽधुना ॥ १ ॥

अष्टमूर्त्यङ्कितो नान्दीश्लोकः सूत्रधरो नटी ।
प्रस्तावनायां तदनुसृतो दुष्यन्तभूपतिः ॥ २ ॥

* * *

सप्तमाङ्के फलं ग्रन्थे दौष्यन्तेश्चक्रवर्तिता ।
पुनरुक्तिं विनासारः कथितो वस्तुसङ्ग्रहः ॥ १९ ॥

व्युत्पन्नैरेव तदिदं संविधानं पुनः पुनः ।
विभाव्यं प्रथमं पश्चान्नाटकं परिशील्यताम् ॥ १० ॥

अथ सायणमायणादिपुरातनकविसमानकालिको भाग्यनिमित्तवशात्काशुकराजकन्योपदेशेन श्यामलादेवीलिखितबीजाक्षरसङ्घः कालिदासकविर्यशसे व्युत्पादकन-

कनिकषोपलप्रायं नाटकं शाकुन्तलं नाम चिकीर्षुरविघ्न-
परिपूरणाय सम्प्रदायानुभवसिद्धं चतुर्दशभुवनात्मकश्री-
मदीशानसम्प्रार्थनारूपमङ्गलमाचरति ॥ येति ॥ आद्या सृ-
ष्टिरापः “अप एव ससर्जादौ” इति स्मरणात् । या अग्नि-
रूपा तनुरिति शेषः ॥

End:

तथा च एकः परमेश्वर एव चतुर्दशभुवननिर्माणशास-
नधौरन्धरीचतुरचतुराननदण्डधरखण्डकतया जन्मलययो-
र्लयप्रदस्तद्व्यतिरिक्तेषु त्रयस्त्रिंशत्सङ्ख्याकेष्वतिथिनन्दनेषु
कश्चिदयोध्याद्वारवत्यादिषु स्थलजलेषु प्रतियुगं जन्मलय-
योरधीनीभवतीति कवेर्भाव इति दिक् ॥

Colophon:

इति महाराजपद + शाकुन्तलसञ्जीवनाख्यटिप्पणे सप्तमोऽङ्कः ॥

बहुधान्यनामसंवत्सरे उत्तरायणे माघमासे शुक्लपक्षे तृतीयायां तिथौ
शुक्रवासरे इदं पुस्तकं नारायणद्रविडेन लिखितम् ।
यादृशं पुस्तकं + मम दोषो न विद्यते ।

Subject: Śākuntalavyākhyā otherwise known as Sañjīvanī.

Remarks:—The Ms. is in a fairly good condition.

A paper transcript of this Ms. is found in this library. See T. V. No. 478.

This commentary is not available in print.

॥ अभिज्ञानशाकुन्तलव्याख्या ॥

4310. ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀ.

J. L. Collection No. 614. Substance—Paper. Size—7½ × 5 inches. Sheets—75. Lines—12 to 13 to a Page. Script—Devanāgarī. No. of Granthas—1850. Author—Ghanaśyāma. Complete.

Beginning, end and subject—Same as No. 4309.

Colophon:

इति महाराजपद० शाकुन्तलसञ्जीवनाख्यटिप्पणे सप्तमोऽङ्कः ॥

सम्पूर्णमिदं घनश्यामपण्डितीयं शाकुन्तलाव्याख्यानम् ॥

Remarks:—The Ms. is in good condition.

॥ अभिज्ञानशाकुन्तलव्याख्यानम् ॥

4311. ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM.

J. L. Collection No. 615. Substance—Paper. Size—7½ × 5 inches. Sheets—37 (25-32 & 59-87). Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Ghanaśyāma. Incomplete. (Wants beginning).

Beginning:

बलवदवस्था । " अवस्थात्वार्तिदर्शयोः " इत्यनेकार्थध्वनिमञ्जरी । निर्वापणाय परिहरणाय ॥

End and colophon—Same as No. 4309.

Subject: Śākuntalavyākhyā—otherwise known as Sañjīvanī

Remarks:—The Ms. is in a fairly good condition.

॥ अभिज्ञानशाकुन्तलप्राकृतविवृतिः ॥

4312. ABHIJÑĀNAŚĀKUNTALAPRĀKṚTA-VIVṚTIḤ.

Burnell's Catalogue No. 5151. Page 173. Right column. Substance—Paper. Size—$9\frac{3}{8} \times 3\frac{3}{8}$ inches Sheets—20. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—430. Author—Nārāyaṇa Bhaṭṭa. Complete.

Beginning:

श्रीगणेशाय नमः । श्रीरेणुकायै नमः ।

नटी— आर्यपुत्रेयमस्मि । आज्ञापयत्वार्यः । को नियोगोऽनुष्ठीयतामिति ।

नटी— सुविहितप्रयोगतया आर्यस्य न किमपि परिहास्यते ।

नटी— एवमेव । अनन्तरं करणीयन्तावदार्य आज्ञापयतु ॥

End:

अनसूया —भगवन् अनया दुहितृमनोरथसम्पन्नया कण्वोऽपि तावत श्रुतविस्तरः क्रियताम् । दुहितृवत्सला मेनका इहैवोपचरन्ती तिष्ठति । मनोरथः खलु मे भगवत्या............ ।

Colophon:

इति श्रीमद्रामेश्वरभट्टसुतनारायणभट्टविरचितायां शाकुन्तलप्राकृतविवृतौ सप्तमोऽङ्कः ॥ ७ ॥

रसवच्चेतो येषां केषामपि जायते सुधियाम् ।
सरसास्त एव येषां सौरभमिक्षोरिवान्यस्मै ॥

Subject: Śākuntalavyākhyā.

Remarks:—The Ms. is in good condition.

The author, Nārāyaṇabhaṭṭa calls himself the son of Rāmeśvara Bhaṭṭa. Perhaps this Rāmeśvarbhaṭṭa is the same as the famous ancestor of Kamalākarabhaṭṭa, in which case the work may be placed in the early half of the 16th century.

॥ इन्दिरापरिणयम् ॥

4313. INDIRĀPARIṆAYAM.

J. L. Collection No. 616. Substance—Paper. Size—12×5 inches. Sheets—30. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—900. Author—Vīrarāghavācārya. Incomplete.

Beginning:

भद्रं वो विदधातु वारिधिसुतावक्षोजकुम्भोज्ज्वलैः
काश्मीरैरतिखण्डिताः सुरवपुर्याकीर्णरक्तैरिव ।
रागं वक्षसि बिभ्रदम्बुजभवाद्युत्तंसिताङ्घ्रिश्शुभैः
रक्तौघैरिव वारिधिर्गुणगणैर्युक्तो वृषाद्रीश्वरः ॥

* * *

नान्द्यन्ते सूत्रधारः ॥

* * *

सूत्र ॥ आर्ये समादिष्टोऽस्मि ॥ श्रीरङ्गराजस्य चैत्र-

यात्रोत्सवसिसेविषासमवेतैरधिगताखिलकलाकलापैर-
शेषभिमतकुमतिनिटिलकुट्टनकुट्टाकपदैषै(?) तत्रभवद्भि-
रखिलैरमीभिः सङ्कल्पयावद्भिः * * *

सू ॥ आमेत्यर्धोक्ते (स्मृतिमभिनीय सहर्षम्) । आ
ज्ञातम् ॥

अस्ति श्रीरङ्गभर्तुः कनकमयमहायज्ञसूत्रावतार-
श्रीरङ्गाचार्यवर्यस्वजनिकृतपरिष्कारवाधूलवंशः ।
बन्धान्मुक्तः करीन्द्रः कृतजनमथनो दूरधूताङ्कुशोद्रा-
क्सेवित्वा यस्य पादौ सविनयकुतुकं स्वीयमालानमाप ॥

तस्मादभूदखिलभूपतिचक्रवाल-
कोटीररत्नरुचिरंजितपादपद्मः ।
औदार्यनिर्जितसुरद्रुमकामधेनु-
श्चिन्तामणिर्वरददेशिकसार्वभौमः ॥

भोगे भूपति रूपे स्मरति शुचित्वे धनञ्जयति ।
वात्सल्येऽपि.........लवरदगुरुवर्यः ॥

* * *

तत्पादाम्बुज(युग्म)भक्तितटिनीकल्लोलिनीवल्लभ...
वात्स्यश्रीमदहोबलार्यजनुषः श्रीशैलसूरेः सुतः ।
विख्यातो भुवि वीरराघवकविः विद्वन्मुदे नाटकं
चक्रे तादृशसंविधानमधुरं हस्ते तदास्ते मम ॥

तत्प्रयुञ्जानः सभामिमां सभाजयामि ॥

नटी ॥ किं णामअं तं णाडअम् (छाया । आर्य किं-
नामकं तन्नाटकम् ॥

सू ॥ कविनैवोक्तं तन्नाम ॥

का सुधाम्भोधितनया कस्तां धत्ते भुजान्तरे ।
इदं प्रश्नोत्तरद्वन्द्वनामकं किल नाटकम् ॥ इति ॥

सू ॥ अयि महत्तम इति वक्तव्यम् ॥ यदस्य कवेः ॥ स्वप्ने
देवः कमलया साकं समेत्य सादरमिदमादिदेश ॥

वीरराघवार्य चारु नाटकं त्वमावयो-
र्नामतः किलेन्दिराविवाहपुल्लसद्रसम् ।
वीतदोषमद्भुतं कुरुष्व मत्प्रसादतः
फुल्लपुष्करक्षरन्मरन्दमञ्जुसूक्तिभिः ॥

* * *

आर्ये किमन्यत् ॥
सहृयावतां समादेशं समग्रयितुमुत्सहे ।
सरोजसम्भवस्याज्ञां सोऽयं सुरमुनिर्यथा ॥

End:

(ततः प्रविशति रत्नाकरः ॥)

रत्नाकरः ॥ अहो मे जन्मनः साफल्यम् । यदिदानीं
वत्साय वृषाचलपतेश्च विवाहमहोत्सवे नयनानन्दम-
नुभवामि ॥ (परिक्रमणमभिनयेन विभाव्य) कथं

निर्वर्तित एव विवहनविधिः यदमूरान्ध्रमहासुरपुरन्ध्रयः शोभनाभिगाथाभिः वधूवरयोराराात्रिकं मंगलमाचरन्ति । तच्चरितमुपसर्पामि (इति तथा करोति) ।

(सर्वे सदस्याः ससम्भ्रममुत्थाय तेन सह यथोचितमुपविशन्ति ।)

रत्नाकरः ॥ (आत्म) दे...... ।

Colophon: (Sheet No. 5.)

चतुर्थोऽङ्कः ।

Subject: Indirāpariṇaya 1-5 acts.

Remarks:—The Ms. is in a decaying condition. Only a few lines are wanting towards the end of the 5th act.

Vīrarāghavakavi, the author of this drama, Indirāpariṇaya, gives his genealagy as follows:—

Ahobalārya (of Vatsa gotra)
|
Śrīśailasūri
|
Vīrarāghava.

The Ahobalārya was the pupil of one Varadadeśikārya, son of Śrī Raṅgācārya of Vādhūlagotra.

Once God Śrī Raṅganātha, the presiding deity of Śrīraṅgam appeared in a dream before the author of the work—Vīrarāghavakavi and ordered him to compose a drama treating of the marriage of Mahāviṣṇu with Lakṣmī. The present work was composed at the order of the God. The drama itself was acted before the audience who were present at the Caitrotsava at Śrīraṅgam. The work has not yet been printed.

॥ उत्तररामचरितम् ॥

4314. UTTARARĀMACARITAM.

Burnell's Catalogue No. 5197. Page 167. Left column. Substance—Paper. Size—$10\frac{1}{4} \times 2\frac{1}{2}$ inches. Sheets—47. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1150. Author—Bhavabhūti. Complete.

Beginning:

श्रीगणेशाय नमः ॥

इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे ।
वन्देमहि च तां वाणीममृतामात्मनः कलाम् ॥ १ ॥

End:

इदमस्तु भारतवाक्यम् ॥

पापेभ्यश्च पुनाति वर्धयति च श्रेयांसि सेयं कथा
माङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च ।
तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः
शब्दब्रह्मविदः कवेः परिणतां प्राज्ञस्य वाणीमिमाम् ॥

Colophon: Nil.

Subject: Uttararāmacaritam 1-7 acts.

Remarks:—The Ms. is in good condition.

Bhavabhūti, it is well known, was the court poet of Yaśovarman and Lalitāpīḍa and he was flourishing in the last quarter of the 8th century. Bhavabhūti was otherwise known as Umbveka and he was a pupil of Kumārila Bhaṭṭa.

There are several editions of this work, the most noteworthy among them being the edition in the Harward Oriental Series by Dr. Belvalker. Consequently the several Mss. of this work have been arranged in a tabular form below.

॥ उत्तररामचरितव्याख्या ॥

4333. UTTARARĀMACARITAVYĀKHYĀ.

J. L. Collection No. 621. Substance—Paper. Size—7½ × 5 inches. Sheets—36. Lines—20 to a Page. Script—Devanāgarī. No. of Granthas—900. Author—Ghanaśyāma. Complete.

Beginning:

श्रीगणपतये नमः ॥

चतुर्दशजगत्क्रोऽस्य नतिमाचक्ष्महे वयम् ।
वश्रिताभेदजैर्मोहैरेतावन्तमनेहसम् ॥ १ ॥

यद्व्याख्याता विद्धसालभाञ्जिका छिद्रितार्थके ।
विद्धे स्तम्भे सालभञ्जिकायिता यत्र नायिका ॥

तनुरुचि यो न श्यामः कविः कवीनां स यदि घनश्यामः ।
कवते कमनश्यामः किमसूयाभिर्मुधैव न श्यामः ॥ ३ ॥

* * *

अथैतन्नाटकस्थायिसंविधानावबोधने ।
वस्तुपात्रादिनिर्देशः संग्रहात्क्रियते मया ॥

इदं कविभ्य इत्यस्मिन्पद्ये प्रामाणिकेरितः ।
वन्द्यो गणेशः पूर्वार्धे उत्तरार्धे सरस्वती ।
श्रीमान्कालप्रियानाथो देवः सूत्रधरो नटः ॥

* * *

भ्रमं विनावधातव्यं मन्त्रज्ञैः सूक्ष्मदृष्टिभिः ।
शिष्योक्तेन पथानेन नाटकं परिशील्यताम् ॥

अथ कालिदासादिसमानकालिको भोजराजाश्रयः श्रीकण्ठनामा "साम्बा पुनातु भवभूतिपवित्रमूर्तिः" इति श्लोकनिर्माणवेलाश्रुणवशादानन्दभरितेन राज्ञैव भवभूतिरिति ख्यापितः कविः ।

End:

कवेर्भवभूतिनाम्नः मम वाणीं नाटकमयीं वाचं अविनयैर्लेखनपठनपाठनप्रचारणाभिनन्दनादिभिः "प्रचारणाद्दौ भावगूढदर्शनेऽभिनये मतः" इत्यगस्त्यः ॥ परिपरितः । परि....रिति केदारः । भावयन्तु लालयन्तु ॥ "आदरे लालने चस्या भावनोक्तिजये" इत्यलमतिविस्तरेण ॥

Colophon:

इति महाराजपद+उत्तररामचरितसञ्जीवनाख्यटिप्पणे सप्तमोऽङ्कः । सम्पूर्णमिदमुत्तररामचरितव्याख्यानम् घनश्यामयिम् ॥ साम्बाय नमः ॥

Subject: Uttararāmacaritavyākhyā, otherwise known as Sañjīvani 1-7 acts.

Remarks:—The Ms. is in a fairly good condition.

Ghanaśyāma has been referred to already as a profuse writer. For detailed remarks on him see No. 3889 of Vol. VII. The present work is a commentary on the Uttararāmacarita by him. The work has been published recently by Mr. Kane, Bombay.

॥ उत्तररामचरितव्याख्या ॥

4334. UTTARARĀMACARITAVYĀKHYĀ.

J. L. Collection No. 623. Substance—Paper. Size—7¼×6

inches. Sheets—40. Lines—16 to a Page. Script—Devanāgarī. No. of Granthas—1280. Author—Ghanaśyāma. Complete. (wants end)

Beginning, end, colophon and subject—Same as No. 4338.

Remarks :—The Ms. is in a fairly good condition.

The introductory portion is missing in this manuscript.

॥ ऐन्दवानन्दनाटकम् ॥

4335. AINDAVĀNANDANĀṬAKAM.

Burnell's Catalogue No. 5250. Page 167. Right column. Substance—Paper. Size—9¼ × 3½ inches. Sheets—70 (3-74 13th missing). Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—1180. Author—Rāmacandra. Incomplete. (wants beginning)

Beginning:

...............केरलीकुन्तलश्री-

विविधसुरभिगन्धिःखेचरघ्राणपेयः ।

उदचरत चिराय श्यामिहानेतुमिच्छ-

न्निव सुरनिकुरुम्बं यद्गृहे यज्ञधूमः ॥

यः खलु कविभिरुपश्लोक्यते ॥

तन्मन्ये भुवनं मनागपि यशःपीयूषसिन्धोः कचि-

त्काले चेदभविष्यदम्बरगलद्द्रागातरङ्गत्विषः ।

मध्ये मेदिनि च प्रतापदहनो नाधास्यदर्चिर्द्वयं

गाढाध्मातसुमेरुशङ्करगिरिः किं हेमरूप्यद्रवैः ॥ १ ॥

अपि च ।

मामैषीः कमले भृशं विकिरति श्रीरामचन्द्रप्रभु-
स्त्वामित्यम्ब तवास्ति पूरणकरः सर्वो नृपाणां गणः ।
भ्राता ते विधुरम्बुधिः किल पितापीतः परे पूर्यते
मायावी न स कृष्ण एष हृदये यस्त्वां चिरं धास्यति ॥ १ ॥

तस्य चक्रवर्तिनः सम्यगानन्दाय भगवद्व्यासपाद-प्रणीत ययातिचरितमाश्रित्य गुहवंशनभस्तलैकहंस गौडेन्द्रमहामात्यकविपण्डितप्राप्तविश्वासस्थानपदवी-कश्रीहर्षपदाभिधेयानामात्मजस्य रामचन्द्रकवेर्विरचना नवीनमैन्दवानन्दनामनाटकमेतदाराधनार्थं मह्यमभि-रोचते । तत्र परामृश्यतु भवान् ।

सूत्रधारः । प्रिये, किं यस्य प्रार्थयितव्यञ्चैतत् ।

कृताञ्जलिर्वः प्रणिपत्य याचे
महानुभावाः परिहासतोऽपि ।
श्लाघाञ्च निन्दाञ्च परीक्षकत्वा-
दयुज्यमानामिह नावहध्वम् ॥

नटी । अह इम् ।

* * *

अवि अ ।

उत्फुल्ला चूअलआ कुसुमहासिअ सोहणी अवासन्ती ।
एक्को भमरजुआणो किं कुणउदुवे पत्तोअन्तो ॥

(नेपथ्ये) सखे सत्वरमेहि अनेन श्रीपिनवत्सना महाराजो यथावियास्यतीति जनश्रुतिः । तदेहि पश्यावस्तावदपूर्वपरिच्छदं भूमिपम् ।

सूत्र । (आकर्ण्य) । प्रिये नृपदर्शनाय मुनिकुमारावित एवाभिवर्तेते । तद्भावि संमर्दा भूमिं त्यजाव इति निष्क्रान्तौ ॥

॥ प्रस्तावना ॥

End:

राजा । भगवति । किमन्यदप्युपकर्तव्यमस्ति ॥

परिवर्तितचेतसी इमे निविडप्रेमतया मिथः कृते ।
अनयोरपि पुत्रकाः पुनः कृपया ते परिवार्तिता मम ॥

तथापीदमस्तु ।

आस्तां दुःखवतां कपर्दिनिमतिः मन्दारदामोज्वला
प्रीयन्तां गृहमेधिषु...... त्याहताः शेरताम् ।
कुर्वन्तु प्रमदासु भूरिषु रतिं तुल्यां युवानः श्रिये
प्रास्निग्धाश्च परस्परं नृपतयो....रं बिभ्रतु ॥

अपि च ।

ग्रन्थग्रन्थिलबुद्धयो मधुरसप्रस्यन्दिवाचश्चिरं
मोदन्तां कवयः कठोरतरुणी(वक्षो)जतुङ्गाशयाः ।
वैदग्ध्यं परिवर्धयन्तु चतुरै(?)रुद्दामधर्मश्रियो
राजानः करवालकालहृदयक्रूरैः खलैर्वर्जिताः ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon:

पूर्णकामोनामाष्टमोऽङ्कः ।

श्रीरामचन्द्रकवेः कृतिरैन्दवानन्दं नाम नाटकं सम्पूर्णम् ॥

॥ शुभमस्तु ॥ श्रीरामकृष्णाय नमः ॥

Subject: Aindavānandanāṭakam 1-8 acts.

Remarks:--The Ms. is in a decaying condition.

One Rāmacandra Kavi is the author of this work. He seems to have been a native of Bengal and he was the son of one Śrī Harṣa.

The work itself deals with the story of Yayāti of purāṇic fame. This drama is not available in print.

॥ कमलाकण्ठीरवम् ॥

4336. KAMALĀKAṆṬHĪRAVAM.

Burnell's Catalogue No. 10683. Page 167. Right column. Substance—Palm leaf. Size—$15\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves —54. Lines—6 to a Page. Script—Grantha. No. of Granthas—1200. Author—Nārāyaṇa. Incomplete.

Beginning:

श्रीगणाधिपतये नमः ॥

वाग्दण्डस्थलान्तः प्रभवमदझरीमज्जदुन्मज्जदुच्चै-
गीयत्स्फायत्प्रमोदभ्रमरवरवधूल्लासमुत्पादयन्तः ।
केऽप्येते स्पर्शमात्राद्विदलितदुरिताः कर्णतालीयवाता
विघ्नाधीशस्य सन्तु प्रसृतपरिमला भूयसे श्रेयसे वः ॥

अपि च ।

संजज्ञे यस्य चन्द्रे मनस (?) दितवांश्चक्षुषो विश्वचक्षु-
र्यस्य प्राणप्रभेदात्समजनि च जगत्प्राण एवं प्रमाणः ।
यद्वक्त्राम्भोजगर्भाज्जननमगमतां जम्भभिद्वीतिहोत्रौ
सोऽयं पायादपायात्पुरुष उपगतोशेषवेषः सदा नः ॥

* * *

सू ॥ आर्ये अपि सुनिर्वर्तितो रङ्गसमुदाचारः । अद्य समु-
दिताः खलु भाग्यवशाद्भगवतः काम्राक्षीवल्लभस्य श्री-
मदेकाम्रनाथस्य यात्राप्रसङ्गेन नानाविधाङ्गवङ्गकलिङ्गम-
गधमालवगौलचोलपाण्ड्यप्रमुखा नानादिग्देशवासिनः
सकलकलाधुरीणाः संश्रितजीवलोकवाञ्छापरिपूरणप-
ठिष्ठषष्ठदेवमहीरुहा सुरवारविलासिनीप्रार्थितयौवन-
श्रिय सकलेबरकलियुगकामदेवा भूमिदेवाः । तत्कुत
उदासते भरताः

* * *

(प्रविश्य) नटी ॥ अय्य कोणु तारिसो पबंधो ।
(आर्य को नु तादृशः प्रबन्धः)

सूत ॥ (स्मरणमभिनीय ।) अस्ति खलु काञ्चीमण्ड-
ले प्रपञ्चितपञ्चमहायज्ञैरसकृदावर्तितसप्ततन्तुभिरन्वह-
मञ्चितार्थिजनसार्थैर्दुरवगाहषड्दर्शनीसरोवराद्य(व)
गाहनक्रीडादिग्दन्तावलैरन्तर्वाणि शिरोमणिभिरधिष्ठी-

यमानः * परमपावनाक्षीणश्रीरनरङ्गिणिताण्डवि-
ततरङ्गरङ्गस्थलायितवलयपरिसरो ब्रह्मदेशोनाम
महानग्रहारः । तत्रास्ति कश्चिद्विपश्चिच्छिखामणिः
षड्दर्शनीसार्वभौमभट्टाचार्यो गौतमान्ववायदुग्धा-
र्णवाभ्युदयपूर्णचन्द्रमाः सरस्वतीभण्डारसूरकारः श्री-
मल्लक्ष्मीधराध्वरिसार्वभौमोनाम पवित्रकीर्तिः ।

तथा हि ।

मिश्रो लज्जाविमिश्रः स्खलति खलमतिः लुप्तधैर्यस्तथार्यः
सन्दिग्धाध्वा च मध्वागमगुरुरधिकक्षामरामानुजोक्तिः ।
निर्वेदी भेदवादी भवति च बहुधा तस्करो भास्करोऽपि
श्रीमल्लक्ष्मीधराध्वर्यतुलबुधवरे वादकेलीं प्रविष्टे ॥

अपिच ।

वाहाग्युक्तिप्रवाहा प्रबलकरिघटा भाट्टवाणीघटास्ता
योधाः सत्तर्कबोधाः शुकगुरुवचसामर्थटीकापताकाः ।
भूषा शेषस्य भाषा गुरुमतिविततं शास्त्रमच्छातपत्रं
श्रीमल्लक्ष्मीधराध्वर्यतुलबुधवरे वादधाटीं दधाने ॥

किञ्च ।

पौष्पान्रसान्परिहसन्ति सुधां वमन्ति
द्राक्षां क्षिपन्ति किल माक्षिकमाक्षिपन्ति ।
संफुल्लवारिरुहगन्धसगन्धभूता
लक्ष्मीधराध्वरिविभोर्वचसां विलासाः ॥

तस्य चात्मसम्भवः सकलसद्गुणसुधासुधाकरः कविता-
वल्लभः कवितार्किकचूडामणिः नारायणो नाम सूरि-
सिंहः ॥ स किल नैसर्गिकसुहृद्भावेन भरतेषु वर्तमानः
स्वयं कमलाकण्ठीरवं नाम नाटकरत्नं निर्माथास्मास्व-
र्पितवान् । तत्किमिति कण्ठकलितचामीकरमापण इव
मृग्यते ।

सूत्रधारः ॥ आर्ये साधु गीतं कर्णामृतम् ।
मनोहारि तथा स्फीतं गीतं ते सचमत्क्रियम् ।
कण्ठीरवस्य चरितमिदं कर्णामृतं यथा ॥
इति निष्क्रान्तौ ॥
॥ प्रस्तावना ॥

End:

चाम्पेयिका ॥ (विदूषकस्योपरि नीलोत्पलं पात-
यति)
विदूषकः ॥ (सहसा प्रबुध्य) अविह अविह कु०
अभअं अभअं ॥ भो भो मण्डूओ मे उवरि पडिदो (भो
भो मण्डूको मे उपरि पतितः) (मण्डूकदर्शनं नाटयति)
राजा ॥ (सहसोपसृत्य) । सखे किमत्याहितम् ॥
(कमलाप्यनुसृत्य) ॥ विहारवापीविलोकनविनि-
र्मितलतावलयवातायनविनिवेशितमुग्ध...... ।

Colophon: (Leaf No. 43)

चतुर्थोऽङ्कः ॥

Subject: Kamalākaṇṭhīrava. 1-4 acts.

Remarks:—The Ms. is in good condition. This Ms. abruptly ends towards the close of the fifth act.

Nārāyaṇa, the author of this drama was the son of Lakṣmīdharādhvarin who was a master of all the Śāstras. They resided in the village of Brahmadeśa on the banks of the Pālār, near Kāñcīpura in the Chingleput District.

The work deals with the story of the marriage of King Kaṇṭhīrava with Kamalā.

The work has not been printed so far.

॥ कलानन्दकम् ॥

4337. KALĀNANDAKAM.

Burnell's Catalogue No. 5247. Page 168. Left column. Substance—Paper. Size—$10\frac{3}{8} \times 5\frac{1}{2}$ inches. Sheets—74. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—Rāmacandraśekhara. Complete.

Beginning:

कल्याणं कलयन्तु साधु जगतां देवाश्च देवीरपि
त्यक्त्वान्योन्यसमागतैकमनसोः संयापितानेहसोः ।
तत्ताहङ्निजयोगवैभवकलासंसिद्धिसंयोगयो-
र्गाढाश्लिष्टवपुष्मतोश्च शिवयोरन्तर्मुदः सन्ततम् ॥

नान्द्यन्ते सूत्रधारः ॥ (नेपथ्याभिमुखमवलोक्य)
आर्ये इतस्तावत् ॥

(प्रविश्य) नटी ॥ अंअइअंहि । दाणिं किणुखु
कादव्वं । आणवेदु अय्यउत्तो ।

सूत्रधारः ॥ अद्य खलु श्रीमत्प्रतापरामचन्द्रसुन्दरतरच-
रणारविन्दद्वन्द्वनिस्यन्दमानमकरन्दबिन्दुसन्दोहसमा-
स्वादनामन्दानन्दतुन्दिलमनोमिलिन्दराजस्य प्रताप-
सिंहमहाराजस्य संपूर्णतपोविशेषैः परमेश्वरस्य
कृपार इव कुपारस्तूर्णमवतीर्णः तुलजमहाराजः राम-
चन्द्रशेखरपौण्डरीकयाजिनं समाहूय स्वविलासेन पर-
माद्भुतवस्तुनन्दकचरितं परिकल्प्य नाटकीकर्तव्यमिति
समादीदिशत् ।

ततस्स कविकुञ्जरः श्रवणरञ्जनं धीमतां
सुधापृषन्माधुरीभरधुरीणमुद्यद्गुणम् ।
नवीनमतनीच्छुभं मधुरकल्पनाकल्पकं
चतुर्मुखवधूपरिष्करणहाटकं नाटकम् ॥

तेन नवेन नाटकेन सामाजिकानुपतिष्ठे ।

नटी ॥ अय्य एआरिससंविहाणणेवुण्णं कुदो से संपण्णम् ।

सूत्रधारः ॥ शृणु तावदतिरहस्यम् । तथाहि ।

कालीवकसरोजसम्पुटनटद्धाटीरसज्ञः कविः
पश्चाद्व्याकरणज्ञतां परिहरन्म्यूनां स्वविद्यास्विव ।
सर्वव्याकरणार्थबोधनकलां पुष्णन् स निष्णातधी-
रिन्वे भोसलसन्ततौ तुलजभूपालापदेशात्खलु ॥

निःसीमा तस्य महिमा ॥

श्रीमान्नेपालपाण्ड्यद्रमिलकुरुमहाराष्ट्रसौराष्ट्रभोज-

स्फूर्जत्कर्णाटलाटक्षितिपतिमकुटोत्तंसिताज्ञामनोज्ञः ।

विद्यापद्यानवद्याद्रकलिततया चण्डवेतण्डगण्ड-

भ्राम्यद्भृङ्गाङ्गनालीमुखरमिह गृहं सत्कवीनां विधत्ते ॥

तं किल ।

जनता वदतीहवाहिनीशं

भुवनाधारतया च सत्त्ववत्त्वात् ।

शिवमाश्रितसर्वमङ्गलत्वा-

द्विलसत्सत्त्वतया परं पुमांसम् ॥

किञ्च ।

दोर्दण्डाग्रविखण्डितुण्डदलितद्विण्मण्डलीकुण्डली

विद्रुत्पाण्डरपुण्डरीकपटलीचण्डांशुरेष प्रभुः ।

येनाकारि रणे कृपाणलतिका पाणौ स्फुरन्ती ध्रुवं

मुक्ताकङ्कणकान्तिभिः कुसुमिता वीरश्रियो वेणिका ॥

यस्य किल समज्यायाम् ।

यशःकलशसिन्धुरात्कुमुदबान्धवा बान्धवाः

प्रबन्धकविसिन्धुरप्रणयदायका गायकाः ।

चतुर्दशकलारसोल्लसनभासुरा भूसुरा

भवन्त्यमृतमाधुरीभरितभाषिता योषितः ॥

* *

सूत्रधारः ॥

प्रतनादपि नूतनं मनोज्ञं

प्रचुरीभूतमलङ्क्रियागुणैश्चेत् ।

तरुणीमपहाय भासुराङ्गीं
रसिकानां जरतीरतिः कुतस्त्या ॥

नटी ॥ को एसो वेहुखग्गपदाहिहेओ महाराओ ।

सूत्रधारः ॥ भद्राचले श्रीरामभद्रः कयोश्चिद्राजदम्पत्योस्तपसा प्रसादितः स्वप्ने नन्दकाख्यमात्मीयं खड्गमादिशत् । गीर्णः स एव पुत्ररूपेण पर्यणंसीत् । ततः पितृभ्यां नन्दक इत्यभिहितः प्रतिदिनसमेधमानमूर्तिराशान्तविश्रान्तकीर्तिरवर्तिष्ट ।

नटी ॥ (सप्रत्यभिज्ञम्) अय्य जोखु सअलमिलिच्छचक्कवट्टिपबलबलावलेपवियडाडविप्पज्जलीदकसणवत्तीक्किदणिभभुअमहापदावोत्ति घणाणिदरणगुणमिलाविदकप्परुक्खपहावोत्ति असेसदिसावआपे सुगुणीअदि । किं सोच्चिअ एसो अच्चरिअं । अय्यउत्त किंणामहेअं एदं रूवअं ।

सूत्रधारः ॥ कलावतीनन्दकमिति ॥

नटी ॥ अय्यउत्त दाणिं णट्टसामग्गो फलिदव्व ।

सूत्र ॥ (सहर्षम्) ।

परिषदियमभिज्ञा पक्षपातानभिज्ञा
सरजसमकरन्दस्यन्दिसूक्तिप्रबन्धा ।
परिमलितदिगन्तः पुष्पगन्धैर्वसन्तः
शुभोनाभिराधेनेता तद्विधातेष्टदाता ॥

End:

त्रिका ॥ (समन्दस्मितं क्षणमात्रं ध्यानमभिनयन्।)

अनन्यसुलभा विद्या निरवद्येयमस्तु ते।

सानुप्रवेन भवता समर्थीक्रियतां पुरी ॥

राजा ॥ परमनुगृहीतोऽस्मि ॥

त्रिका ॥ (सानन्दम् ।) राजन् किन्ते भूयः प्रियमुपहरामि।

राजा ॥ (सादरपरितोषम्)। यदि मम स्वामी भग-

वान् प्रसन्नः किमतः परं प्रियमस्ति ।

तथापीदमस्तु भरतवाक्यम् ।

ब्राह्मं तेजः कल्पतां क्षत्रियाणां

गुप्तैः क्षात्रं सन्ततं ब्राह्मणानाम् ।

यद्वेदानामिन्दुमौलेः परत्वं

निःसन्देहं तत्सतामात्रिरस्तु ॥

Colophon:

इति निष्क्रान्ताः सर्वे ॥

सप्तमोऽङ्कः ॥

Subject: KalāvatInandaka. 1-7 acts.

Remarks:—The Ms is in good condition. On the title page is found तुलजभूपकृत.

Rāmacandraśekhara, the author of this drama was a contemporary of King Tulaja, the son of Pratāpasihma. Tulaja reigned between 1765-1787 A.D. at Tanjore. The drama under reference seems to have been composed at a time when Pratāpsihma was alive and ruling the country. Pratāpasihma reigned from 1741 to 1764 A.D. The work deals with the story of the separation of Kalāvatī from her beloved Nandaka and their re-union later on.

This is not available in print.

॥ कलानन्दकछाया ॥

4338. KALĀNANDAKACHĀYĀ.

Burnell's Catalogue No. 5248. Page 168. Left column.

Substance—Paper. Size—$10\frac{7}{8} \times 5\frac{1}{2}$ inches. Sheets—13. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—228. Author—?. Complete.

Beginning:

श्रीगणेशाय नमः ॥

आर्य इयमस्मि । इदानीं किंनु खलु कर्तव्यम् । आज्ञापयत्वार्यपुत्रः । आर्य क एषः । (किं) नामधेयः कवीश्वरः । स यदि अम्बादुग्धसमुद्रपूर्णचन्द्र इति बहुशः श्रुतपूर्वः ।

End:

एष आर्यपुत्रः । अधन्याया मम विश्लेषदुःखानुभवेन प्रभातराकाशशाङ्क इव परिक्षामपाण्डरो दृश्यते । निर्घृणा अहं कथमेनमुपसर्पामि । जयतु देवः ॥

अकारणकुपितया मया आर्यपुत्रचरणयोरपराद्धमिति फणितुमपि न पारयामि ॥

Colophon:

सप्तमोऽङ्कः ॥

॥ साम्बसदाशिवार्पणमस्तु ॥

Subject: Kalānandakachāyā. 1-7 acts.

Remarks:—The Ms. is in a fairly good condition. This work contains the Sanskrit renderings of the Prākṛt passages contained in the Kalānandaka. This is not available in print.

॥ कान्तिमतीपरिणयम् ॥

4339. KĀNTIMATĪPARIṆAYAM.

Burnell's Catalogue No. 5256. Page 168. Left column. Substance—Paper. Size—$8\frac{1}{4} \times 5\frac{7}{8}$ inches. Sheets—86. Lines—8 to a page. Script—Devanāgarī. No. of Granthas—860. Author—Cokkanātha. Complete.

Beginning:

सानन्दं मणिमञ्चसीमनि वसन्वक्षोजचेलाञ्चलं
व्याकृष्याथ सलज्जमाशु विनतग्रीवं कृतस्वास्तिकाम् ।
तत्कालस्पृहणीयपार्श्वनखविन्यासैर्यथावत्स्थिता-
मालिङ्गन्जनकात्मजां रघुपतिः पुष्णातु वः कौतुकम् ॥

अपि च ।

रहस्यक्षद्यूते विजितमवलोक्य त्रिनयनं
प्रतिज्ञारक्षार्थे पुरहर सकामाङ्कुररतिम् ।
उदीर्यैवं तस्मिन्नथ च परिरब्धुं व्यवसिते
हसन्ती रुद्राणी विशदयतु भद्राणि भवताम् ॥ २ ॥

(नेपथ्याभिमुखमवलोक्य) । मारिष इतस्तावत् ।

(प्रविश्य पारिपार्श्वकः) । भाव एषोऽस्मि ॥

सूत्र ॥ बृहत्कुचनायिकावल्लभस्य भगवतो मध्या-

र्जुनेशस्य............

चैत्रोत्सवं द्रष्टुमिहोपयातै-
वैदेशिकैरस्मि समीरितोऽहम् ।
प्रख्यातकीर्तेर्नृपतेश्चरित्रं
प्रयुज्यतां रम्यगुणं त्वयेति ॥ ३ ॥

पारि ॥ भवतु किमिदानीं प्रयुयुक्षितं भावेन ।

सूत्र ॥ ननु रम्यगुणमिति वचनेनैव कान्तिमतीशाह-
राजीयनाटकादन्यन्नावर्तितमित्यनवसरदुःस्थोऽयम-
नुयोगः ॥

पारि ॥ अविमृश्य मयेदमिदमुदीरितमिदानीं भवति ।
तस्यैव प्रयोगः प्रभवति सामाजिकमनोविनोदनाय ।

तथा हि—

नेता शाहमहीन्द्रो नाटकमतिचित्रसंविधानपदम् ।
एषा सभा रसज्ञा कविरपि चास्यैव चोक्कनाथसुधीः ॥ ४ ॥

सूत्र ॥ नेता शाहमहीन्द्र इति सम्यगभिहितं भवता ।

तथा हि—

गाम्भीर्याद्याः सुगुणा यस्मिन्निवसन्ति कृतसमयबन्धाः ।
यस्य करेर्नन स वर्ण्यः कविता विरसैव तस्य सरसापि ॥ ५ ॥

पारि ॥ को नामैष चोक्कनाथसुधीः ।

सूत्र ॥ किं न जानासि तं महात्मानम् ।

पारि ॥ जानाम्येतानद्रमचिला माल्गस्य भाणस्य क-
वयितेति । किन्तु कस्याः ? कस्य पुत्रः ? किमाचारः ?

इत्येतत्पृच्छामि ।

सूत्र ॥

सकलकलास्वपि निपुणो नरसाम्बाविमलगर्भसम्भूतः ।
तिप्पाध्वरीन्द्रतनयः शाहमहाराजपुरकृतावासः ॥ ६ ॥

पारि ॥ तस्य जगदाचार्यस्य तिप्पाध्वरीन्दोरयं पुत्र इति महदिदमुत्कर्षस्थानम् ।

तथाहि—

भाष्यादिग्रन्थजातं सकलमपि सदा पाठयन्तो महान्तो
भूपालश्लाघ्यमाना विनिहितविजयस्तम्भजाला दिगन्ते ।
प्राप्ते वादे बुधेन्द्रैरहमहमिकया पूर्वमेवाभिधान्तो
देशे देशे वसन्ति प्रसृमरयशसो यस्य शिष्यप्रशिष्याः ॥ ७ ॥

सूत्र ॥ अन्येषु बुधेषु भजदपीदं वचनमतिशयोक्तिमस्मिन्महानुभावे सदर्थकमपर्याप्तश्चालक्ष्यते ॥

पारि ॥ तर्हि सकलकलावल्लभस्य कुप्पाध्वरिणो वादकेसरिणास्तिरूमलशास्त्रिणश्च कनीयानिति वक्तव्यम् ॥

सूत्र ॥ शैशवाभ्यस्तसकलशास्त्रयोः स्वामिशास्त्रिसीताराशास्त्रिणोरपि ॥

पारि ॥ "पितुस्समनुवर्तन्ते नरा मातरमङ्गनाः" ।
इति वाल्मीकेर्वचनमप्रच्युतार्थकमत्रैवेति मन्ये । किञ्च ।

तिप्पाध्वरीशितुः पुण्यपुरुषस्य महात्मनः ।
श्रवणेन ममेदानीमभवज्जन्म पावनम् ॥ ८ ॥

भवतु । पात्रकृतिं कथं मन्यते भावः ।

सूत्र ॥ कुम्भकोणनगरवासिने चित्रवेषाय पत्रिकां प्राहिणवम्:—

सखे कान्तिमतीशाहराजीयं नाम नाटकम् ।
अभिनेतुं त्वमायाहि शीघ्रं परिजनैः सह ॥ ९ ॥ इति

पारि ॥ साध्वनुष्ठितं भावेन यतः—

अत्यल्पेन च रूपकेण जनयत्याश्चर्यमन्यादृशं
नानावेषपरिष्कृतैरभिनयैः सोऽयं नटाग्रेसरः ।
सम्प्रत्यद्भुतसंविधानमधुरेणानेन सामाजिका-
नेतात्रञ्जयतीति भाव भणितव्यं तावदस्त्यत्र किम् ॥ १० ॥

सूत्र ॥ उत्तरमपि तेन प्रेषितम् । स्यादेतदेवम् ॥ सन्ध्यासमये सह परिजनैः सहागच्छामि । किन्तु विदूषककविराक्षसस्य दैवज्ञनागज्योतिषिकस्य च वेषपरिग्रहाय सज्जीभवतु भवानिति ।

(आकाशे कर्णं दत्वा) ॥ अहो भरताचार्यश्चित्रवेषः समागत्य नेपथ्यान्तरे माङ्गलिकमातोद्यं प्रवर्तयति ।

(नेपथ्ये)

पडिपदणिरुद्धगमणो णिणदंतमिलिंदमहुअरकुलेहिं ।
मअरंदबिंदुवइअरसुरहीपरिदो विचलदि पवणोऽयम् ॥ १० ॥

सूत्र ॥ (आकर्ण्य) । गीतिरपि वसन्तर्तुमधिकृत्यारब्धा । तदेहि, किं विलम्बेन, गच्छावः । दैवज्ञनागज्योतिषिकस्य भूमिका मया परिगृह्यते । त्वया च विदूषक-

कविराक्षसस्य परिगृह्यताम् ॥ इति निष्क्रान्तौ ॥

॥ प्रस्तावना ॥

End:

राजा ॥

सुचित्तः सचिवो यस्य वयस्यः कविराक्षसः ।

प्रसन्ना कमलाम्बा च किमन्यत्तस्य मे प्रियम् ॥

तथापीदमस्तु भरतवाक्यम् ॥

संवर्धन्तामजस्रं सरसमृदुगिरां सत्कवीनां वचांसि

क्षोणीपालाः समस्ताः सुकृतपथमुपाश्रित्य तिष्ठन्तु नित्यम् ।

आचन्द्रार्कं प्रबन्धो बुधजनहृदये वर्ततां ह्येष एष

श्रीमानस्यापि नेता जयतु भुवि चिरं शाहराजः प्रजाभिः ॥

Colophon:

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभस्य जगदाचार्यस्य तिप्पाध्वरिणस्त-

नूजेन चोक्कनाथविद्वत्कविना विरचिते कान्तिमतीशाहरा-

जीयनाटके पञ्चमोऽङ्कः ॥ लेखकपाठकयोः शुभं भवतु ॥

Remarks :—The Ms. is in very good condition. After the colophon is given the following :—

अयि मयि न हि रक्तोऽचुम्बितोल्लेखनैर्यः

स तु विभुरनुरज्यन्पुस्तकोल्लेखनेन ।

पतिरननुविलासैः स्वैरसाध्योऽपि साध्य-

श्चतुरतरतरुण्यापादसंवाहनेन ॥

Kāntimatīpariṇayam, otherwise known as Kāntimatī-Śāharājīyam is a drama by one Cokkanāthakavi. This Cokkanātha ought to be differentiated from his namesake, the father-

in-law of Rāmabhadradīkṣita. This author is the son of Tippādhvarin and was a native of Śāhajirājapuram. He seems to have been a contemporary of Śāhaji (1684-1710.) This Tippādhvarin was one of the donees of Śāhajirājapuram.

The work under notice deals with the marriage of Śāhaji with Kāntimatī and is therfore of much local interest. The work is unpublished.

॥ कान्तिमतीपरिणयम् ॥

4340. KĀNTIMATĪPARIṆAYAM.

Burnell's Catalogue No. 10636. Page 168 Left column.

Substance—Palm leaf. Size—15¾ × 1¼ inches. Leaves—62. Lines—6 to a Page. Script—Grantha. No. of Granthas—900. Author—Cokkanātha. Complete.

Beginning and subject—Same as No. 4339.

End:

संवर्धन्तामजस्रं सरसमृदुगिरां सत्कवीनां वचांसि
स्तम्भं प्राप्नोतु सद्यः श्रुतिपुटपरुषा साहिती दुष्कवीनाम् ।
आचन्द्रार्कं प्रबन्धो बुधजनहृदये वर्ततां ह्येष एष
श्रीमानस्यापि नेता जयतु भुवि चिरं शाहराजः प्रजाभिः ॥

Colophon:

इति श्रीमच्छृङ्गारद्राज + पञ्चमोऽङ्कः ॥

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामाय नमः ॥

शेषाद्रिणा स्वहस्तेन लिखितम् ॥

॥ कान्तिमतीपरिणयम् ॥

4341. KĀNTIMATĪPARIṆAYAM.

Burnell's Catalogue No. 10637. Page 168. Left column. Substance—Palm leaf. Size—$17\frac{3}{4} \times 1\frac{3}{8}$ inches. Leaves—48. Lines—5 to a Page. Script—Telugu. No. of Granthas—900. Author—Cokkanātha. Complete.

Beginning, end, colophon and subject—Same as No. 4339.

Remarks:—The Ms. is in a fairly good condition.

॥ कुन्दमाला ॥

4342. KUNDAMĀLĀ.

Burnell's Catalogue No 10676. Page 168. Left column. Substance—Palm leaf. Size—$16\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—45 (157-201). Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—800. Author—Dhīranāga. Incomplete. Wants beginning.

Beginning:

....पमपि यत्नमतिवर्तन्ते गान्धर्वप्रिया वाजिनः ।

तथा हि—

अमी पतद्भिः श्रवणेषु मन्द्र......... ।

......संयमस्य तुरङ्गमास्तूर्णतरं प्रयान्ति ॥

....लाङ्गुमन्त्रातिरभसप्रवृत्तवेगत्वाभालक्षित स.........

....तयन्ति । तत्सर्वात्मना क्रियतां यत्नः ।

End :

वा ॥ तथापीदमस्तु ॥

स्थाणुर्वेधास्त्रिधामा मकरवसतिः पावको मातरिश्वा

पातालं भूर्भुवस्स्वश्चतुरुदधिसामयजुश्चाथर्वणश्च(?) वेदाः ।

सम्यक्संसिद्धिविद्यापरिहृततपसः पीडिताभिश्च....

श्रेयांस्यस्मिन्नरेन्द्रे विदधतु सकलं वर्धतां गोकुलञ्च ॥

(इति निष्क्रान्ताः सर्वे)

Colophon :

षष्ठोऽङ्कः ॥

अनूपुराधस्य कवेर्धीरनागस्य कृतिः कुन्दमाला नाम नाटकं

समाप्तम् ॥

Subject: Kundamālā. 1-6 acts.

Remarks:—The Ms. is in a fairly good condition.

The Kundamālā has been published in the Dakṣiṇabhārata series, under the editorship of Messrs M. Rāmakṛṣṇa Kavi. M. A, & S. K. Rāmanāthaśāstriar. The work has been published in the name of Diṅnāga and it gave room to a good deal of speculation regarding the contemporaniety of Kālidāsa and Diṅnāga and their mutual relations. The name of the author appears in both the Mss. in this library as Dhīranāga.

A perusal of the work will convince anybody that the author of the Kundamālā could not have been a Buddhist; for, even an indirect reference to the Buddha and his followers is absent in this work.

The work deals with the story of the Uttarakāṇḍa of the Rāmāyaṇa.

॥ कुन्दमाला ॥

4343. KUNDAMĀLĀ.

Burnell's Catalogue No. 10675. Page 168. Left column. Substance—Palm leaf. Size—14×1½ inches. Leaves—28. Lines—6 or 7 to a Page. Script—Telugu. No. of Granthas—800. Author—Dhīranāga. Incomplete. Wants beginning.

Beginning, end, colopon and subject—Same as No. 4342.

Remarks :—The Ms. is in a fairly good condition.

॥ कुमारविजयम् ॥

4344. KUMĀRAVIJAYAM.

J. L. Collection No. 623 Substance—Paper. Size—8×5 inches. Sheets—20. Lines—18 to a Page. Script—Devanāgarī. No. of Granthas—650. Author—Ghanaśyāma. Complete.

Beginning:

श्रीगणपतये नमः ॥

नद्याहरन् हरकपर्दिजुषोऽम्बुजानि
हृद्यानि मातरि सह प्रमथैर्हसन्त्याम् ।
हृद्या चकास्तु शिशुकेलिपरः स कोऽपि
विश्वावलीकुतुकनाटकसूत्रधारः ॥ १ ॥

॥ नान्द्यन्ते सूत्रधारः ॥

(नेपथ्याभिमुखमवलोक्य) मारिष इतस्तावत् ॥
प्रविश्य पारिपार्श्वकः ॥)

पारि ॥ भाव अअं मि ।

सू ॥ मारिष । परिषदा सादरमाहूय नियुक्तोऽस्मि ।

पारि ॥ कहं विअ ॥

सू ॥ सभाजनसभाजनसमुचितं किमपि रूपकं निरूप्यता-
मिति ॥

पारि ॥ अत्थि तारिसं किं वि ॥

सू ॥ अस्ति नाम कुमारविजयाभिधानं नाटकम् ॥

पारि ॥ को णु तस्स कई ॥

सू ॥ श्रूयताम् ॥ समासतो निवेदयामि ।

यस्येशोप्रभवः पिता किल महादेवः स काशीप्रसूः
साधुः श्रेयसि सुन्दरी प्रियतमा शाकम्भरी च स्वसा ।
सप्ताष्टोक्तिलिपिप्रभुर्गुणनिधिश्चौण्डाजिबालाजिस-
त्पौत्रोऽयं विभुरब्दविंशतिमितः चौण्डाजिपन्तः कविः ॥ ४ ॥

End:

देवः ॥ (सोल्लासम्) । देवि किमतः परमपि प्रियमस्ति ।
तथापीदमस्तु भरतवाक्यम् ॥

आपन्नासनमापतन्नमखिलाः सत्वा लभन्तां सुखं
विद्वांसोऽपि भवन्तु सत्कविगिरां गुम्भे गुणग्राहिणः ।
बाढव्यं (?) भुवि जायतामपि सदा षट्कर्म नित्यादरं
साधूनामभिमानसारणि परंज्योतिः परिस्पन्दताम् ॥ १५ ॥

अपि च ॥

शिवमयभगवत्पादब्रह्मानन्दप्रसादतो रचितम् ।

ब्रह्मानन्दविजयमिदमिह नाटकमतुलमाधुर्वं जीयात् ॥

॥ इति निष्क्रान्ताः सर्वे ॥

Colophon:

पञ्चमोऽङ्कः ॥

सम्पूर्णमिदं कुमारविजयाभिधानं नाटकम् ॥

Subject: Kumāravijayanāṭaka. 1-5 acts.

Remarks:—The Ms. is in good condition.

There is a paper transcript of this Ms. in this library. See T. V. No. 466.

Enough has been said already about Ghanaśyāma. This drama of his, which is unpublished till now, deals with the story of God Subrahmaṇya.

॥ कुमारविजयम् ॥

4345. KUMĀRAVIJAYAM.

J. L. Collection No. 624. Substance—Paper. Size—$7\frac{1}{2} \times 5$ inches. Sheets—23 (out of 1-24 22nd missing). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—275. Author—Ghanśyāma. Incomplete.

Beginning—Same as No. 4344.

End:

श्टं ॥ मएउण मंदहाए पादाललोअं गदा एसा न ल-

क्खिदा ॥ तदो तदो ॥

र ॥ तस्सि......... ।

Colophon: Nil.

Subject: Kumāravijaya. 1-3 acts.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly ends in the middle of the 3rd act. There are two fragmentary sheets dealing with the prastāvanā of this Nāṭaka.

॥ कुशकुमुद्वतीयम् ॥

4346. KUŚAKUMUDVATĪYAM.

Burnell's Catalogue No. 10677. Page 168. Left column. Substance—Palm leaf. Size—$15\frac{7}{8} \times 1\frac{1}{2}$ inches. Leaves—61. Lines—6 to a Page. Script—Telugu. No. of Granthas—1500. Author—Atirātrayājin. Complete.

Beginning:

श्रीकण्ठस्य शिरस्पदे त्रिजगतीनिष्पत्तिदिव्यौषधे-
रश्रान्तभ्रमदभ्रसिन्धुलहरीमालाभिरार्द्रीकृते ।
नूत्नामङ्कुररेखिकामिव बहोः कालाद्बहिर्निर्गतां
वन्दे चान्द्रमसीं कलामनुकलं बोधाय बोधात्मिकाम् ॥ १ ॥

किञ्च ॥

कल्याणावसरे सह स्मरजिता कल्याणपीठे स्थिता
सख्या पार्श्वगया तदात्वपुलकस्वेदो निरीक्ष्यात्मनः ।
भीता किं पतिभूषणोरगततेस्तन्मौलिगङ्गाम्भसा
सिक्ता किं त्वमितीरिता गिरिसुता नम्रानना पातु वः ॥

अपि च ॥

स्निग्धश्यामलवामभागकबरीभारप्रभानीलिम-
व्याप्तिप्राप्तकलिन्दजापदशिरोमन्दाकिनीसुन्दरः ।

फालाग्निज्वलनोष्मलब्धतपनीभावेन्दुचूडामणि-

गौरीविभ्रमललितचन्दनसितग्रीवः शिवः पातु नः ॥ २ ॥

॥ नान्द्यन्ते ॥

सूत्रधारः ॥

स्वज्योतिर्मण्डलान्तर्घृतनयकठिनं मूर्तिमद्ब्रह्म यस्मि-

न्नीलग्रीवं त्रिनेत्रं निवसति सकलैश्चक्षुषा गृह्यमाणम् ।

सोऽयं ध्येयस्त्रिसन्ध्यं त्रिभिरपि विधिवद्वर्णभेदेन वर्णै-

राज्ञावष्टान्तमन्तःकरणचणमसौ खण्डयेच्चण्डभानुः ॥

(इति पुष्पाञ्जलिं विकीर्य)

(पञ्चपदानि मत्वा) । (समन्तादवलोक्य) । हन्त

जगदानन्दकेन कन्दलितं वसन्तेन । यतः ।

मन्दस्पन्दनचन्दनाचलमरुद्व्याधूतचूताङ्कुर-

च्छेदास्वादकषायकण्ठमधुरव्याहारिपुंस्कोकिलाः ।

उत्सर्पद्भुजदर्पदर्पकजगत्संमोहनेच्छामृत-

प्रादुर्भावितमोहनास्त्रकुसुमाक्रान्ताः वनान्ता इमे ॥

(प्रविश्य)

पारिपार्श्वकः ॥ अद्य श्रीहालस्य चैत्रोत्सवयात्रायामा-

मार्यमिश्राः समापतन्ति ।

सू ॥ किं समापतन्तीति ।

* * *

(परिषदं निर्वर्ण्य) । (सानन्दम्) । अथवा किमभि-

मतेति । सर्वस्यापि प्रार्थितदुर्लभैवैषा यतः ॥

विद्वद्वाद निवादकालयुगपद्विस्फूर्त्यहंपूर्विका
निर्युक्तिसहस्रदर्शितनिजाहीन्द्रावताराकृतिः ।
कर्तुं कारयितुं तथा रसयितुं काव्यानि नव्यान्यलं
भूष्णुर्भाति सभासभाजितमतिः श्रीनीलकण्ठाध्वरी ॥

* * *

सूत्र ॥ अयङ्खिल भरद्वाजकुलपारावारपारिजातसकलकला-साम्राज्यसिंहासनाधिपतिस्तत्रभवतः श्रीमतो नाराय-णाध्वरिणस्तपःपरिपाकः, कर्ता काव्यानाम्, व्या-कर्ता तन्त्राणाम्, आहर्ता क्रतूनाम्, व्याहती ..., नृप-सभेषु दिगन्तरविश्रान्तकीर्तिमपारमहिमा मानवाकृतिः साक्षादेव दाक्षायणीवल्लभः श्रीकण्ठमतसर्वस्ववेदी श्रीनीलकण्ठाध्वरी ।

नटी ॥ (उरसि हस्तं निधाय) । णं एणं ण आणामि एसो खु दुवीअसंकररूवाणं अप्पयदीक्खिआणं णत्तरो नलचरिअनाडअप्पबंधा (नन्वेतन्न जानामि एष खलु द्वितीयशङ्कररूपाणामप्पयदीक्षितानां नप्ता नलच-रितनाटकप्रबन्धा ।)

सूत्र ॥ अथ

सूत्र ॥ ज्ञातस्तवाभिप्रायः ।

स्वादूनेव रसान् कटून्विदधतां कर्षन्तु नामेति च
क्रन्दन्त्वेव पदानि वा क्रथयतां कुर्वन्तु लज्जां च वा ।

कुत्रैको मधुरो रसः क मधुरा वाणीति नो जीवतां
कर्णौ निष्करुणं दहन्ति कवयः कस्मादिदानीन्तनाः ॥

इत्यतो नलचरितश्लोकाकूतामासि । मामेवम् ।

तच्छिक्षया परिणतं तदतिप्रियश्च
तत्कर्णपारितमभूदपि यस्य काव्यम् ।
तेनेदमद्य निरवद्यरसानुसारि
तेने नवं प्रकरणं तदिह प्रयोज्यम् ॥

नटी ॥ कुत्त तवाडअम् । (कुत्र नाटकम् ।)

सू ॥ (पुस्तकमर्पयति ॥)

नटी ॥ (गृहीत्वा) तत तत वाचयन्ती ।

पंचविहवत्थुचरिअं
कज्जावत्थाणं पंचअसमेदम् ।
रूवअमिदमणुरूवं
उवट्ठिदाए विअड्ढगोट्ठीए ॥

(पञ्चविधवस्तुचरितं कार्यावस्थानां पञ्चकसमेतम् ।
रूपकमिदमनुरूपमुपस्थितायां विदग्धगोष्ठ्याः ॥)

अस्सअ णाम कुसकुमुज्जइअंति ।
(अस्य च नाम कुशकुमुद्वतीयमिति)

तेण धीरोदत्तो अस्स णाअओत्ति दंसिदम् ।
(तेन धीरोदात्तोऽस्य नायक इति दर्शितम्)

सू ॥ आर्ये एवमेतत् ।

वैदर्भीरीतिरेकैव चतस्रोऽप्यत्र वृत्तयः ।
अङ्गी रसोऽस्य शृङ्गारः केनेदमुपमीयताम् ॥

न ॥ को णु किं णामहेओ एदंणाडअप्पणेदा ।
(को नु किं नामधेय एतन्नाटकप्रणेता ।)

सू ॥ नन्वस्यैव समानेतुरनुजन्मा विदितवेदितव्यः कविलोकाभिरामतिरात्रयाजी ।

न ॥ जुज्जइ जुज्जइ । को अण्णो ईरिस णिरवज्जसरसकविकम्मणिम्मादा । स इल पइरहुवंसादिकत्तेति रसिअगोट्ठीसु जोहुस्सइ । (युज्यते । कोऽन्य ईदृशनिरवद्यसरसकविकर्मनिर्माता । स किल प्रतिरघुवंशादिकर्तेति रसिकगोष्ठीषु जोघुष्यते ।)

सू ॥ कविरयं कालिदास इव स्वयमम्बिकादासतया तदाज्ञामन्तरेण निश्वासमपि न करोति । किम्पुनस्तादृशं प्रबन्धम् ।

नटी ॥ तहवि गायति ।

चलपल्लवहत्थाओ महुपरवेहिं कुहुमुहकुहुहिम् ।
अण्णोण्णेण भणंते काणणलच्छीवसंतलच्छीओ ॥
(चलपल्लवहस्तैर्मधुपरवैःकुहुमुखकुहूभिः ।
अन्योन्येन भणन्तः काननलक्ष्मीवसन्तलक्ष्म्यौ) ॥)

सू ॥ (सानन्दम्) आर्ये तवैतेन गीतेन परस्परेण सं-

लपन्त्यौ द्वे देवते सूचिते। तदयोध्याधिदेवताया नागरिकायाः सरय्वधिदेवताया सागरिकायाश्च भूमिकापरिग्रहेण पात्रद्वयं प्रवेशनीयमित्यर्थतो निर्दिष्टं भवति। ततस्तदनुरूपं प्रवर्तामहे।

(इति निष्क्रान्ताः सर्वे)

॥ प्रस्तावना ॥

End:

राजा ॥ सर्वोऽप्ययं भवत्या महिमेति वदन् स्वकण्ठात्कुसुद्वतीहारमादाय तस्याः पुलकिनि स्वेदकाम्बिते कण्ठे समर्पयन्, प्रिये पश्य पश्य।

मन्दस्मितद्युतिझरीभिरुदित्वरीभिः
संवर्धमानसितिमद्धिरेष हारः।
स्वस्थानमेत्य सुखमद्य तव स्तनाद्रिं
क्रीणाति मे हृदयमेतदमूल्यमेव ॥

किन्ते भूयः प्रियमुपहरामि। तथापीदमस्तु भरतवाक्यम्।

वन्ध्या भवन्तु वनिताः कुकविप्रसूतौ
व्युत्पित्सवोऽपि हि कृतीः सरसाः पठन्तु।
विज्ञाश्च तत्र रसमेव विवेचयन्तु
सामाजिका भुवि भवन्तु रसैकनिष्ठाः ॥

किन्त्वेयं सुकुमारमञ्जुलपदन्यासा समासादितप्रौढालङ्कृतिरङ्कुरन्मनसिजा शृङ्गारचारुः कृतिः।
आवर्ज्य स्वयमेव वाक्यरचनैरानन्दनिष्यन्दिभिश्चुम्बन्ती वदनाम्बुजं हृदि समारूढा नृणां क्रीडतु ॥

मूर्खेण शुष्ककलहः कविखेदहेतु-

र्भावज्ञविज्ञकलहः कृतिशोधहेतुः ।

मूढस्त्रिया विहरतोऽपि निशा किमस्ति

प्रौढस्त्रिया विहरतस्तु सुखाब्धिरस्ति ॥

इति निष्क्रान्ताः सर्वे

Colophon:

॥ पञ्चमोऽङ्कः ॥ श्रीः ॥

समाप्तञ्चेदं नाटकं कुशकुमुद्वतीयम् ।

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीकण्ठमतनि-

र्वाहकपूर्वकचतुरधिकशतप्रबन्धनिर्मितृत्वलक्ष्मीणश्रीमदप्पयदीक्षितसोद-

रश्रीमदाच्चादीक्षितपौत्रस्य श्रीनारायणदीक्षितनन्द्रवरसूनोरतिरात्रया-

जिनः कृतिषु कुशकुमुद्वतीयं नाम नाटकं समाप्तम् ॥ १५ ॥

ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।

कण्ठं भित्त्वाविनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥

इदं कुशकुमुद्वतीयं नाम नाटकं रामभट्टेन लिखितम् ॥

Subject: Kuśakumudvatīya. 1-5 acts.

Remarks:—The Ms. is in a fairly good condition. This Ms. is full of scriptorial blunders.

The author of this work, Atirātrayājin is the younger brother of the famous Nīlakaṇṭhadīkṣita, grandson of the brother of the still more famous Appayya Dīkṣita. Under the presidency of Nīlakaṇṭha Dīkṣita the drama seems to have been enacted at Madura. The work deals with the story of the marriage of Kuśa, son of Rāma with Kumudvatī, a Nāga

princess. The author seems to have developed this theme, which is only lightly touched upon in the 16th canto of the Raghuvamśa. The work is not available in print.

॥ कुशकुमुद्वतीयम् ॥

4347. KUŚAKUMUDVATĪYAM.

Burnell's Catalogue No. 10678. Page 168. Left column. Substance—Palm leaf. Size—17 × 1¼ inches. Leaves—62. Lines—7 to a Page. Script—Grantha. No. of Granthas—1500. Author—Atirātrayājin. *Complete.*

Beginning, end, colophon and subject—Same as No. 4346.

Remarks:—The Ms. is in a fairly good condition.

A paper transcript of this work is available in this library. See T. V. No. 470.

On the title page is found कुम्भकोणस्थितपुस्तकम्

॥ कंसवधम् ॥

4348. KAMSAVADHAM.

Burnell's Catalogue No. 5215. Page 169. Right column. Substance—Paper. Size—9½ × 4¼ inches. Sheets—59. Lines—10 to 11 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Kṛṣṇa. Complete.

Beginning:—

प्रारम्भः शुभकर्मणस्त्रिभुवनक्लेशाभिचारागमः

कान्ताकर्षणकर्मकार्पणविधिः कामाद्वितीयश्रुतिः ।

हुङ्कारो मदनस्य निर्वृतिवधूमञ्जीरशिञ्जाध्वनि
श्रेयःसम्पदमातनोतु भवतः कंसारिवंशीरवः ॥

End:

अपि च

साहित्यामृतसान्द्रसिन्धुलहरी निर्व्याजमज्जन्मनो
मज्जानाः परिशीलितामलकला मोदेन मेदस्विनः ।
उत्पत्काव्यकथाप्रबन्धमधुरद्राक्षासरक्षाक्षराः
स्वैरं कंसवधं सुधाधिरतरं गायन्तु कृष्णानुगाः ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon:

सप्तमोऽङ्कः ॥

Subject: Kamsavadha, 1-7 acts.

Remarks:—The Ms. is in good condition. Alternate sheets are sulpherated. On the title page is given

'तुलजाराजस्येदं पुस्तकम्'

Kamsavadhanāṭaka has been published by the Nirṇayasāgar Press, Bombay. The work deals with the slaying of Kamsa by Lord Śrī Kṛṣṇa while he was yet a boy of six.

॥ कंसवधम् ॥

4349. KAMSAVADHAM.

Burnell's Catalogue No. 5216. Page 167. Right column.

Substance—Paper. Size—9¾ × 4½ inches. Sheets—4. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Kṛṣṇa. Complete.

Beginning, end, colophon and subject—Same as No. 4348.

Remarks:—The Ms. is in a decaying condition. After the colophon we find:—

श्रीपतिना लिखितम्

॥ कंसवधम् ॥

4350. KAMSAVADHAM.

Burnell's Catalogue No. 3218, Page 167. Right column.

Substance—Paper. Size—10 × 1½ inches. Sheets—37. Lines—11 to 13 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Kṛṣṇa. Complete.

Beginning, end, colophon and subject—Same as No. 4848.

Remarks:—The Ms is in good condition. On the title page

'इदं पुस्तकं कंसवधस्य सदाशिववैद्यसूनुना गणेशेन लिखितं स्वार्थं

॥ कंसवधम् ॥

4351. KAMSAVADHAM.

Burnell's Catalogue No. 5217. Page 167. Right colum

Substance—Paper. Size—9¾ × 4⅛ inches. Sheets—51 Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Kṛṣṇa. Incomplete.

Beginning:—Same as No. 4848.

End:

राम: ॥ (निष्क्रम्य) । (पितृभ्यामान्वितः प्रविशति ।)

देवकीवसुदेवौ ॥ (पुरो निरूप्य) अये कथमुग्रसेनो-

स्त्युग्रोत्कण्ठापूर्णकण्ठस्तूर्णोपकल्पितो जल्पार्द्रणोपक-
रणोऽतिरभसवलितेनान्तः..........

Colophon: (Sheet 48)

इति षष्ठोऽङ्कः ॥

(Sheet No. 51)

इति कंसवधनाटकं समाप्तम् ॥

Remarks:—The Ms. is in a fairly good condition. Some sheets are sulpherated.

॥ कंसवधटीका ॥

4352. KAMSAVADHATĪKĀ.

Burnell's Catalogue No. 5219. Page 167. Right column. Substance—Paper. Size—$7\frac{3}{8} \times 4\frac{1}{2}$ inches. Sheets—35. Lines—11-15 to a Page. Script—Grantha. No. of Granthas—800. Author—? Complete.

Beginning:

श्रीगणेशाय नमः ॥

"सूत्रधारः पठेन्नान्दीं मध्यमं स्वरमाश्रितः ।
नान्दीपदैर्द्वादशभिरष्टाभिर्वाप्यलङ्कृता ॥" इति
भरतोक्तेर्नाटकादौ पूर्वरङ्गाङ्गभूतामाशीरूपां द्वादशपदां
नान्दीं पठति ॥

प्रारम्भ इत्यादि ॥ शुभस्य कर्मणो जन्मान्तरार्जितस्य
सुकृतस्य फलम् न ह्यकृतपुण्याः प्राकृता भगवद्भक्तिरसुधा-
सारात्मकं तारब्रह्मानन्दमपरोक्षीकर्तुमर्हन्ति । अथवा ॥
शुभस्य कर्मणो रासोत्सवादेर्निरतिशयानन्दात्मकादेरार-

म्भः। प्रारम्भतेऽनेनेति प्रारम्भ ओंकारः। विघ्नविघातक-
त्वेन नादरूपत्वेन च रूपकम्। ॐकार इत्येव तु कण्ठतो
नोक्तम, शूद्रास्तं मा शृण्वन्त्विति। तथा त्रिभुवनस्य ये
क्लेशा दुःखानि अविद्यास्मितादयो वा तेषामभिचार
उत्पादनं तत्साधनमागमो मन्त्रः। यथाभिचारमन्त्रप्रयो-
गेण शत्रवो नाश्यन्ते। एवं वंशीरवश्रवणेनापि त्रिविधता-
पोपशान्तिर्भवतीति भावः। तथा कान्तानां माधुर्येणाका-
कर्षणरूपं यत्कर्म तदर्थं कार्मणविधिः मूलकर्मप्रयोगः।

End:

कलाः सङ्गीतादिरूपाः। उदात्तकाव्यकथाप्रबन्धैः मधु-
राणि सरसानि माधुर्यातिरेकात्। द्राक्षामद्यशान्यक्षराणि
येषान्ते। बुधा देवाः। कृष्णानुगाः कृष्णैकशरणाः। त-
त्कृतं कंसस्य वधं गायन्तु, कंसं हत्वा कृष्णेन वयं रक्षिता
आनन्दिताश्चेति, सर्वदा स्तुवन्तु। अथ च कृष्णानुगाः
कृष्णेऽत्यन्तमनुरक्ता बुधाः पण्डिता अपि कंसवधं नाम
नाटकं चिरतरं भगवत्प्रीतये गायन्तु। गायन् विलज्जोऽपि
चरेदसङ्ग इति वचनादित्यर्थः।

Colophon:

सप्तमोऽङ्कः॥

कंसवधटीका समाप्ता॥

श्रीपातिना लिखितेयं कंसवधटीका॥

Subject: Kamsavadhanāṭakavyākhyā 1-7 acts.

Remarks:—The Ms is in good condition.

॥ कंसवधटीका ॥

4353. KAMSAVADHATĪKĀ.

Burnell's Catalogue No. 5220. Page 172. Right column.

Substance—Paper Size—$9\frac{1}{8} \times 4\frac{1}{4}$ inches Sheets—28.
Lines—11 or 12 to a Page Script—Devanāgarī. No. of Granthas—800. Author—? Complete.

Beginning, end, colophon and subject—Same as No. 4352.

Remarks:—The Ms. is in good condition.

॥ चण्डकौशिकम् ॥

4354. CANḌAKAUŚIKAM.

Burnell's Catalogue No. 5206. Page 168. Right column.

Substance—Paper. Size—$9\frac{3}{4} \times 4$ inches. Sheets—43.
Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—756. Author—Āryakṣemeśvara. Complete.

Beginning:

श्रीगुरुभ्यो नमः ॥

देवस्त्रैगुण्यभेदात्सृजति वितनुते संहरत्येव लोका-
नस्यैव व्यापिनीभिस्तनुभिरपि जगद्व्याप्तमष्टाभिरेव ।
वन्द्यो नास्येति पश्यन्निव चरणगतः पातु पुष्पाञ्जलिर्वः
शम्भोर्नृत्यावतारे वलयफणिफणाफूत्कृतैर्विप्रकीर्णः ॥

अपि च ॥

अरुणनयनं सभ्रूभङ्गं स्फुरिताधरं
सुतनु शशिनः श्लिष्टां कान्तिं करोतु तवाननम् ।

कृतमनुनयैः कोपोऽयं ते मनस्विनिरर्थता-

मिति गदितयाश्लिष्टो देव्या शिवाय शिवोऽस्तु वः ॥

॥ अपि च ॥

आनन्दश्लथिताः समाधिषु मुखे गौर्या विलासोल्बणाः

सम्भ्रान्ताः क्षणमञ्चिताः क्षणमथ स्मेरा निजे वैकृते ।

क्रूराः कृष्णशरासने मनसिजे दग्धे घृणाकूणिता-

स्तत्कान्ताहृदितेऽश्रुपूरतरलाः शम्भोर्दृशः पातु वः ॥

End:

तथापीदमस्तु ॥

प्रमुदितसुजना समृद्धसस्या

भवतु मही विजयी च भूमिपालः ।

कविभिरुपहिता निजप्रबन्धे

गुणकणिकाप्यनुगृह्यतां गुणज्ञैः ॥

॥ अपि च ॥

येनादिश्य प्रयोगं घनपुलकभृता नाटकस्यास्य हर्षा-

द्वस्त्रालङ्कारहेम्नां प्रतिदिनमकृशाराशयः संप्रदत्ताः ।

तस्य क्षत्रप्रसूतेर्भ्रमतु जगदिदं कार्तिकेयस्य कीर्तिः

पारे क्षीराख्यसिन्धोरपि कवियशसा सार्धमभ्रेसरेण ॥ ३० ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon:

॥ पञ्चमोऽङ्कः ॥

Subject: Caṇḍakauśika 1-5 acts.

Remarks:—The Ms. is in good condition.

The Caṇḍakauśika deals with the familiar story of Hariścandra and Viśvāmitra. The work is available in print having been published at Calcutta. The author of the work is Kṣemeśvara and he should not be confused with Kṣemendra the author of the Aucityavicāracarcā. Kṣemeśvara's name appears as Kṣemendra in certain Mss.

॥ चण्डकौशिकम् ॥

4355. CAṆḌAKAUŚIKAM.

Burnell's Catalogue No. 5207. Page 168. Right column.
Substance—Paper. Size—9¾ × 4½ inches. Sheets—33. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—750. Author—Āryakṣemendra. Complete.

Beginning, end and subject—Same as No 4354.

Colophon:

॥ पञ्चमोऽङ्कः ॥

इति श्री आर्यक्षेमेन्द्रकृतं चण्डकौशिकं नाम नाटकं समाप्तम् ॥

श्रीकल्याणसुन्दरस्वामिने नमः ॥

श्रीरस्तु ॥

Remarks:—The Ms. is in good condition.

॥ चण्डकौशिकम् ॥

4356. CAṆḌAKAUŚIKAM.

Burnell's Catalogue No. 5208. Page 168. Right column.
Substance—Paper. Size—10 × 4½ inches. Sheets—29.

Lines—9 to 11 to a Page Script—Devanāgarī. No. of Granthas—756. Author—Āryakṣemendra. Complete. Beginning, end, colophon and subject—Same as No. 4355.

Remarks:—The Ms. is in good condition.

॥ चण्डकौशिकम् ॥

4357. CAṆḌAKAUŚIKAM.

J. L. Collection No. 223. Substance—Paper. Size—9½ × 4½ inches. Sheets—13. Lines—12 to a Page. Script—Devanāgarī, No. of Granthas—500. Author—Kṣemeśvara. Incomplete.

Beginning—Same as No. 4354.

End:

उपाध्यायः । (चिरमवलोक्य) (मन्त्रिस्मयम्)

(आत्मगतम्)

शिरोयदवगुण्ठितं महजरूढलज्जाननं

गतश्चपरिमन्थरं चरणकोटिलक्ष्यं द......

Colophon : (Sheet No. 10)

द्वितीयोऽङ्कः ॥

Subject: Caṇḍakauśikam 1-3 acts.

Remarks:—The Ms. is in a fairly good condition. The Ms. abruptly ends in the middle of the 3rd act On the title page is given

'उपकारिगोपाळचार्यस्येदं पुस्तकम्'

॥ चन्द्रलेखाविद्याधरम् ॥

4358. CANDRALEKHĀVIDYĀDHARAM.

Burnell's Catalogue No. 10696. **Page** 168. **Right column.** Substance—Palm leaf. Size—14×1 inches. **Leaves—33** (87-119 of which leaves 99th broken, 106th one side blank, two leaves for each of 112, 113 & 114). **Lines—5 or 6 to** a Page. Script—Grantha. No. of Granthas—300. **Author** —?. Complete.

Beginning:

श्रीकान्तप्रियमातनोतु भवतां शृङ्गारयन्रुक्मिणीं
नलिनेत्यर्थसमुद्गतेन वचसा तां वीक्ष्यमाणां क्षणात् ।
प्रत्युद्यत्प्रतिबिम्बकुन्तलततिं प्रत्यग्रकस्तूरिका-
पत्राङ्कुरचमत्क्रियां व्यपदिशन् प्रस्तावनां गण्डयोः ॥

॥ नान्द्यन्ते सूत्रधारः ॥

(नेपथ्याभिमुखमवलोक्य)

शृङ्गारजीवितफलं सङ्गीताद्वैतलाञ्छनातत्त्वम् ।
साक्षाद्भवतु तदेतत्सामाजिकरसिकचक्षुरायुष्यम् ॥

आर्ये कृतश्चिरायितेन । (प्रविश्य नटी ॥)

नटी ॥ का णाम अण्णा अय्यस्स ।

सू ॥ किमन्यत् । अशेषजगदवनजागरूकस्य शेषाच-
लचूडामणेर्देवदेवस्य वसन्तयात्रायां नेत्रातिथेयं
विधेयमस्य यथावदभिमतवरवसनभूषणस्य महा-
स्नानस्य ।

सू ॥ आर्ये किमेतदनवगतं भवत्या । अयि निवेद्यते
जगति तमन्तरेण कोवान्यो वदान्यमूर्धन्यः ॥

नटी ॥ अम्महे विम्मअणिज्जाणुभावेण एदिणा विरूअणि-
वमगुणालंकारपेडअं चंदलेहाविज्जाहरं णामणाडअं ।

सू ॥ तदेतदभिनीयानुपमरसभावनाभाजनान् समाजनान्
सभाजयामः ।

* * *

सू ॥ (विभाव्य) अये स एष चन्द्रलेखाजनयितुर्महाराज-
तारापतेरन्तरङ्गभूतः सम्मोहन इति यथार्थनामा सीमा-
नियमितसकलजन्तुजालस्य महेन्द्रजालस्य । य एषः ।

फालाकल्पितयोगचूर्णतिलकं पाणौ वहन्पिञ्छिकां
गाढग्रन्थिनिबद्ध(योग)गुलिकाग्रैवेयकालङ्कृतः ।
रागोद्गारकठारलोचनशिखाकण्ठात्तकादिम्भाजनो
मायामयग्रन्थ(क)रेवलम्ब्य शनकैरायाति सिद्धाग्रणीः ॥

किमत्रावामिति निष्क्रान्तौ ॥

॥ प्रस्तावना ॥

End:

तथापीदमस्तु भरतवाक्यम् ॥

कल्याणानि भवन्तु सर्वजगतां वर्षन्तु कालेऽम्बुदाः
भूपा धर्मपरायणाः प्रतिदिशं दीव्यन्तु दीर्घायुषः ।
सर्वेषां जगतामधीश्वरतया सौभाग्यवस्त्वार्जितं
कल्याणानि करोतु तारकरिपुः कल्याणभाग्योदयः ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon:

पञ्चमोऽङ्कः ॥

समाप्तमिदं चन्द्रलेखाविद्याधरं नाम नाटकम् ॥

॥ शुभमस्तु ॥

Subject: Candralekhāvidyādhara. 1-5 acts.

Remarks:—The Ms. is in a fairly good condition. There is a paper transcript of this Ms. in this library. See T V. No. 28.

In this drama, the Vidūṣaka brings about the union of the lovers, Vidyādhara and Candralekhā after great difficulty. The author of the drama is unknown. The work is not available in print.

॥ चन्द्रशेखरविलासम् ॥

4359. CANDRAŚEKHARAVILĀSAM.

Burnell's Catalogue No. 5258. Page 168. Right column. Substance—Paper Size—9½ × 4 inches. Sheets—13. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—Sāharāja. ? Complete.

Beginning:

जय पार्वतीरमण, जय पन्नगाभरण,

जय सुरानतचरण, जय दीनतरण ।

जय अखिलस्तुतचरण, जय अनङ्गहरण,

जय दुरितशमन...............॥ १ ॥

जय रविशशिनेत्र, जय राजराजमित्र,

जय नामपवित्र, जय सुचारित्र ।

जय मुनिकृतस्तोत्र, जय कर्पूरगात्र,
जय सदावासगोत्र, जयसुन्दरवक्त्र ॥ २ ॥

* * *

सूत्रधारवचनम् ॥ एवं नाट्यादौ मङ्गलं कृत्वा कविः स्वेष्टदेवतां नमस्करोमि । श्लोकः ॥

यस्य पादाब्जयुगलं प्रणम्याखिलदेवताः ।
प्राप्य श्रियमना....ता सशिवोऽस्तु शिवाय नः ॥

सू ॥ एवं इष्टदेवतां नमस्कृत्य नाटकारम्भे निर्विघ्नतासिद्ध्यर्थं वाक्याद्युर्यार्थकल्पनसिद्धये च प्रणामपुरःसरं प्रार्थितो विघ्नराजस्तदुपरि दयातिशयेनास्मिन् चन्द्रशेखरविलासमहानाटके या रङ्गभूमौ सा रङ्गं नृत्यं कर्तुं परिक्रामति ॥

End:

अनन्तरं नारदाद्या मङ्गलं गायन्ति ॥ मङ्गलम् ।

मङ्गलं शशिधराय मङ्गलं शिवाय ।
प्रणतार्तिहराय परमेश्वराय ।
प्रणव(व) स्वरूपाय फालकनेत्राय ।
फणिराजभूषाय प्रमथनाथाय ।
कनकाद्रिचापाय कालकण्ठाय ॥

भोसलकुलशाहभूपतिसेव्याय
वासवादिसुरनिकरवन्दितपदाय ।
वासुदेवकीमुखोरगवरविभूषाय
भावितसकलभुवनभव्यरूपाय ॥ २ ॥

Colophon:

यू ॥ इति श्रीमद्भोसलकुलाम्बुधिसुधाकरश्रीशाहमहाराजविर-
चितचन्द्रशेखरविलासनाटकम् ॥
सकलश्रेयःप्रदसकलरसिकाविद्वज्जनप्रीतये श्रीसाम्बशिवार्पणमस्तु ॥
श्रीसच्चिदानन्दार्पणमस्तु ।

Subject: Candraśekharavilāsa.

Remarks:—The Ms. is in good condition. This Ms. appears to be a rendering of a Telugu drama in Sanskrit. The greatness of Śiva is the subject matter of this drama.

There is a paper transcript of this Ms. in this Library. See T. V. No. 461. The work is not available in print.

॥ जानकीपरिणयम् ॥

4360. JĀNAKĪPARIṆAYAM.

Burnell's Catalogue No. 5819. Page 168. Right column.
Substance—Paper. Size—14×6 inches. Sheets—82.
Lines—10 to a Page. Script—Devanāgarī. No. of
Granthas—2200. Author—Rāmabhadradīkṣita. Complete.

Beginning

श्रीगणेशाय नमः ॥

संसक्तानिव पातुमौपनिषदप्याहारमाघ्नारिसा
तुन्माद्दे व्रजसुन्दरीकुचतटीपाटीररेणूनिव ।
उन्मीलन्मुरळीनिनादबहळामोदेऽपि सीदद्गवी-
जिह्वालीढमलीकवल्लवशिशोः पादाम्बुजं पातु नः ॥

End:

तथापीदमस्तु भरतवाक्यम् ।

मार्गं दर्शितमाश्रयन्तु मनुजा मन्वादिभिः श्रेयसे
राजानोऽप्यगृहीतपैशुनगिरो रक्षन्तु धन्या महीम्।
लालयन्तां सरसोक्तयश्च कवयः शुभ्रद्रसैर्जनैः
स्यादेतस्य कवेश्च भक्तिरचला देवे रघूणां प्रभौ ॥ ६२ ॥
इति निष्क्रान्ताः सर्वे ॥

Colophon:

इति जानकीपरिणयं नाम नाटकं सम्पूर्णम्।

Remarks:—The Ms. is in good condition. Alternate sheets are sulpherated.

The story of the Jānakī Pariṇaya is familiar to almost all. It deals with the marriage of Rāma with Sītā. The author is the famous Rāmabhadra Dīkṣita, the illustrious contemporary of Śāhaji and pupil of Śrī Nīlakaṇṭha Dīkṣita. For detailed information regarding Rāmabhadra Dīkṣita, see Indian Artiquary, Vol. XXXIII. The work was published by Mahāmahopādhyāya Lakṣmaṇa Suri at Tanjore in 1907.

॥ जानकीपरिणयम् ॥

4361. JĀNAKĪPARIṆAYAM.

T. S. Collection No. 780. Substance—Paper. Size—11 × 8¼ inches. Sheets—79. Lines—11-12 to a Page. Script—Devanāgarī. No. of Granthas—2200. Author—Rāmabhadradīkṣita. Complete.

Beginning, end, colophon and subject—Same as No. 4360.

Remarks:—The Ms. is in a fairly good condition.

॥ जानकीपरिणयम् ॥

4362. JĀNAKĪPARIṆAYAM.

S. K. Collection No. 216. **Substance**—Paper. **Size**—10×4 inches. Sheets—107. Lines—9 to 12 to a Page. Script—Devanāgarī. No. of Granthas—2200. Author—Rāmabhadra. Complete.

Beginning, end, colophon and subject—Same as No. 4360.

Remarks:—The Ms. is in a fairly good condition. This is written by several scribes.

॥ जानकीपरिणयम् ॥

4363. JĀNAKĪPARIṆAYAM.

Burnell's Catalogue No. 6238. Page 168. Right column. **Substance**—Paper. Size—9½×4½ inches. Sheets—93. Lines—8 to 10 to a Page. Script—Devanāgarī. No. of Granthas—2200. Author—Rāmabhadradīkṣita. Incomplete. (wants end)

Beginning—Same as No. 4360.

End:

कौ ॥ वत्स किं ते भूयः प्रियमुपहरामि ॥

रा ॥

निर्विघ्नं मम जानकीपरिणयो जातः प्रसादेन ते
पौलस्त्यं सगणं विजित्य समरे प्रत्याहृतेयं प्रिया ।
दृष्टोऽयं भरतश्चिराभिलषितो राज्याभिषेकोऽपि मे
लब्धः किं प्रियमन्यदस्ति भुवने यत्साधनीयं त्वया ॥

तथापीदमस्तु भरतवाक्यम् ।

Colophon: (Sheet No. 70)

षष्ठोऽङ्कः ॥

Subject:—Jānakī Pariṇaya. 1-7 acts.

Remarks:—The Ms is in good condition.

॥ जानकीपरिणयम् ॥

4364. JĀNAKĪPARIṆAYAM.

Burnell's Catalogue No. 5239. Page 168. Right column. Substance—Paper. Size—11 × 4¾ inches. Sheets—118. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—2200. Author—Rāmabadradīkṣita. Incomplete. (Wants end)

Beginning, end, colophon and subject—Same as No. 4363.

Remarks:—The Ms. is in good condition.

॥ जानकीपरिणयम् ॥

4365. JĀNAKĪPARIṆAYAM.

S. K. Collection No. 215. Substance—Paper. Size—11 × 4 inches. Sheets—39. Lines—9 to a page. Script—Devanāgarī. No. of Granthas—800. Author—Rāmabhadra. Incomplete.

Beginning—Same as No. 4360.

End:

का ॥ (सोद्वेगमात्मगतम्) । मारीचानुचरोऽयम्भवेत् । मारी-

चश्च कश्चिदपरश्चाथ मायां प्रयुङ्क्त इति विदितमिदानीम् ॥

Colophon: (Sheet No. 10)

इति द्वितीयोऽङ्कः ॥

Subject: Jānakī Pariṇayanāṭaka 1-3 acts.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly ends in the middle of the third act.

॥ जाम्बवतीपरिणयम् ॥

4366. JĀMBAVATĪPARIṆAYAM.

Burnell's Catalogue No. 10691. Page 168. Right column. Substance—Palm leaf. Size—17¼ × 1¾ inches. Leaves—58. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—1600. Author—Kṛṣṇadevarāya. Complete.

Beginning:

वाञ्छां वः सततं देयात्पद्मारणमुखं महः ।
यच्चन्द्रमौलेरानन्दनिष्यन्दं प्रथमं विदुः ॥

* * *

॥ नान्द्यन्ते सूत्रधारः ॥

(सानन्दं परिक्रम्य) ॥ (सपुष्पाञ्जलिक्षेपम् ॥)

विश्वामित्रमहासत्रपरित्राणविधायिने ।
असुराहक्रियाहारिसहसे महसे नमः ॥

* * *

सू ॥ आर्ये किं न पश्यसि । अद्य खलु भगवतश्चराचरगुरो- .... विजयनगरनिवासवासनावशीरितनन्दनगविहार-दोहलस्य हेमकूटगिरिकटकवास्तव्यकुटुम्बिनः कर्णा-

टराज्यरत्नामणेः श्रीविरूपाक्षदेवस्य चैत्रोत्सवालोक-
नाय सङ्गता परिषत् ॥

........................कृष्णरायः कविः

सूक्तिः कर्णरसायनं सुमनसां श्लाघ्यस्वभावा सभा ।
चारित्र्यं यदुवंशशेखरमणेर्देवस्य सर्वोत्तरं
पारम्पर्यकृतश्रमाः पुनरमी नाट्येन पा......यम् ॥

॥ किञ्च ॥

असारामपि गृह्णन्ति वाचं हरिकथाश्रयाम् ।
सुमनोगन्धलोभेन सूत्रं शिरसि धार्यते ॥

(नेपथ्ये)

साधु ॥ रङ्गोपजीवि कुरङ्गलोचने साधु । मध्यवसितम-
नुकूलयतीव ते मतार्थः

(नेपथ्याभिमुखमवलोक्य)

अये नारदः ।

महतीं मुदमावहन्वदन्त-
र्महतीवादनमांसलानुभावैः ।
अयमभ्युपयाति हन्त साक्षा-
दरविन्दासननन्दनो मुनीन्द्रः ॥

आवामप्यनन्तरवर्णिकायै प्रयतावह इति निष्क्रान्तौ ॥

इति प्रस्तावना ॥

End:

श्रद्धा ॥ देव किन्ते भूयः प्रियमुपहरामि ॥

देव किमतः परमपि प्रियमस्ति ।

भुवि जनपरिवादो वारितो रत्नलाभा-

द्वरकुलगुणरूपा वल्लभाभूदियश्च ।

किमिह बहुभिरुक्तैस्त्वञ्च दृष्टोऽसि साक्षा-

दकृतकवचनानामादिमः सम्प्रदायः ॥

तथाप्येवमस्तु भरतवाक्यम् ॥

लक्ष्मीः स्थैर्यं भजतु विदुषां मन्दिरेषु प्रकामं

सन्तः काव्यं परिणतरसं सन्ततं भावयन्तु ।

कोदण्डाङ्कं किमपि करुणापूरपूर्णायताक्षं

श्यामं धाम श्रयतु सततं चेतना मामकीना ॥

एवमस्त्विति निष्क्रान्ताः सर्वे ।

Colophon:

॥ पञ्चमोऽङ्कः ॥

समाप्तञ्चेदं नाटकम् ॥

धर्मः पादचतुष्टयेन कृतवत्स्थैर्यं समालम्बतां

चातुर्वर्ण्यमुपैतु कर्म सततं स्वस्वाधिकारोचितम् ।

शेषक्ष्माधरनायकस्य कृपया समार्णवीमक्षयां

रक्षन्गामिह कृष्णरायनृपतिः जीयात्सहस्रं समाः ॥

समाप्तमिदं राजाधिराजपरमेश्वरसकलकलाभोजराजविभवमूलराय-

गण्डकमत्कृष्णरायमहाराजविरचितं जाम्बवतीकल्याणं नाम नाटकम् ॥

श्रीहरिः ॐ ॥ शुभमस्तु ॥

श्रीपरमेश्वराय नमः ॥ श्रीवासुदेवाय नमः ॥

Subject: Jāmbavati Kalyāṇam 1-5 acts.

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is

……..निघण्टुः

Kṛṣṇa Deva Rāya, the author of this drama was the famous Emperor of Vijayanagar in the beginning of the 16th century. He was far famed for his patronage of learned men and was himself well versed both in Sanskrit and in Telugu. The present drama deals with the expedition of Śrī Kṛṣṇa to the nether worlds regarding the famous jewel, Syamantakamaṇi and the consequent marriage with Jāmbavati - a story narrated in the Bhāgavata. The work speaks well of the poetical attainments of its royal author. The drama is not available in print.

॥ जाम्बवतीकल्याणम् ॥

4367. JĀMBAVATĪKALYĀṆAM.

Burnell's Catalogue No. 10692. Page 168, Right column.

Substance— Palm leaf. Size—14×1 inches Leaves —86. Lines—5 to 6 to a Page. Script—Grantha No. of Granthas—1600. Author--Kṛṣṇadevarāya. Complete.

Beginning, end, colophon and subject—Same as No. 4366.

Remarks:—The Ms. is in a decaying condition.

॥ नलचरित्रम् ॥

4368. NALACARITRAM.

Burnell's Catalogue No. 5255. Page 169. Left column.

Substance—Paper. Size—9×4½ inches. Sheets—68(3-70,

64th missing). Lines —8 to a Page. Script—Devanāgarī.
No. of Granthas—1130. Author— ? Incomplete.

Beginning:

(नेपथ्ये) वयस्य कलहंस परमेश्वरस्य युगादिदेवस्य सपर्यया वयमतीव परिश्रान्ताः। तदादेशय खरमुखं येनाऽस्मद्विश्रामहेतुं कामसमुच्छ्रायकमस्मदुपुथानप्रदेशमवलोकयति(?)।

सूत्र॥ (समाकर्ण्य)। कथं नलनेपथ्याध्वरिनटो वदति। तदेहि मारिष वयमप्यनन्तरकरणीयाय सज्जीभवामः।

(इति निष्क्रान्तौ)

आमुखम्।

End:

अपि च। मुग्धे किं पावके दग्धैः स एव प्रियप्राणः ते। तैस्तैरशुभैः शुभैर्वा कर्मभिर्भिन्नवर्त्मनि सञ्चरिष्णवः सर्वजन्तवः कलापान्थनायं तस्यैव प्रियस्य प्राप्त्यर्थं न च धर्मार्थं प्रयत्नः। किन्तु क्षत्रियाचारानुचरणार्थं प्रियाप्रियनिवृत्त्यर्थं वा।

नलः॥ (स्वग) अहो कौतुकं एतावदरण्ये व्यालानां बलि...................।

Colophon: Sheet No. 51.

इति पञ्चमोऽङ्कः।

Subject: Nalacarita. 1-6 acts.

Remarks:—The Ms. is in a fairly good condition. It is of North Indian script. This Ms. abruptly begins from the Prastāvanā which is herein styled Āmukha and ends towards the close of the sixth act.

The author of this drama - Nalacaritanāṭaka - is unknown. At any rate, it is certain that he was different from the famous Nīlakaṇṭha Dīkṣita, who too wrote a Nalacaritanāṭaka. The work deals with the purāṇic story of Nala and Damayantī. The work is not yet printed.

॥ नलानन्दम् ॥

4369. NALĀNANDAM.

Burnell's Catalogue No. 6254. Page 169. Left column. Substance—Paper. Size—9¼ × 4¼ inches. Sheets—42. Lines—8 to 11 to a Page. Script—Devanāgarī. No. of Granthas—620. Author—Jīva. Complete.

Beginning:

श्रीमन्माधवपादपङ्कजयुगं पायादपायात्सदा
पारावारसुताकराम्बुजमृदुस्पर्शेन संलालितम् ।
गङ्गायत्नखनिर्गतामभवत्कल्याणदा सर्वदा
सर्वेषां भविनां भवाब्धितरणित्रैलोक्यचिन्तामणिः ॥

। नान्द्यन्ते सूत्रधारः ॥

अलमति नान्दीविस्तरेण । यतः कालक्षेपो हि कालक्षेपाक्षेपिमनसां विषादाय । (सबहुमानमात्मानमवलोक्य)। अहो खल्वनुगृहीतोऽस्मि । निगृहीतसकलसामन्तसीमन्तिनीजननयनकीलालकल्लोलिनी कूलानुकूलविहारिहारितरकीर्तिराजहंसेन राजहंसेन * द्विजजनपरिपालनहेतुतया गृहीतशस्त्रेण वेदवेदततुपुत्रेण * कोनेरिनाम्ना

महीकलत्रेण । यथा किल रसगर्भसन्दर्भविशेषेण सामाजि-
ककुतूहलं निस्तुलं कलयामि । * *

सूत्र ॥ मारिष शृणोषि अद्भुतरसमयमद्भुतकरं नलानन्दं
नाम नाटकम् ॥

न ॥ भाव अपि जानासि कर्तारमस्य रूपकस्य ॥

सू ॥ कथमज्ञात एव भवता । तथाहि—

किं खण्डः किमु माक्षिकं किमथवा गोक्षीरधारा किमु
प्रत्यग्रं दिक्षुतदिक्षुः किं पुनरिदं पीयूषमामुष्मिकम् ।
इत्थं नैकविधामवाप्य बहुधा सन्देहदोलां बुधाः
दोलन्ते श्रवसा यदीयकविताधारां पिबन्तो मुहुः ॥ ३ ॥

अरुन्धतीमितीदर्पान् रुन्धती निजचर्यया ।
जयन्ती यस्य जननी जयन्तीव या क्षितेः ॥ ४ ॥

जीवनाम्नः कवेस्तस्य कोनेरितनुजन्मनः ।
कृतिं विद्धि नलानन्दं सुब्रह्मण्यप्रसादतः ॥ ५ ॥

नटी ॥ भाव क एष सुब्रह्मण्य इति नाम परिष्करोति ।

सू ॥ यन्नैपुण्यकलाविलासजलधावाप्लुत्य वाचस्पति-
स्तत्तादृग्गरिमाणमाप यदसौ नाम्ना ततोऽभूद्गुरुः ।
यद्भोजः कणिकामवाप्य गणिकाः रम्भादिका वैरिणः
सद्यश्चित्य दृश्यन्दकम्पकलितस्वान्ता लभन्ते तमाम् ॥ ६ ॥

तत्रावकस्य कविकुलतिलकस्य भरद्वाजगोत्रसम्भवस्य
पितुर्व्यतपोपविष्टतया च देशिकाशिखामणिः ॥

नटी ॥ अहो धन्यता मान्यता च वेदभानोः ।

End:

(नेपथ्ये ।)

न्यायेनासाद्य राज्यं पुनरपि निषधक्ष्मापतिः पुष्करात्स्वा-
दानन्दाब्धौ निमज्जन्निखिलजनमनोरञ्जयन्सिंहपीठे ।
देव्या साकं समस्तैरपि विबुधजनैर्बन्धुभिश्चाभिषिक्तः
पुण्यश्लोकोऽयमेको जयति जगदानन्दसन्दोहकन्दः ॥

तथापीयमस्तु भरताशीः ॥

वृष्टिः पुष्णातु सस्यं जनयतु जनता मोदमेषा धरित्री
सर्वे सर्वसहायां विगतबहुविधोपप्लवाः सन्तु भूपाः ।
द्वैते नास्तां मनीषा गुणगणभरिते श्रीनिकेते परस्मि-
न्निर्दोषे पुंसि नित्यं विधिमखविनुते सच्चिदानन्ददेहे ॥

Colophon:

इति श्रीकविकुलतिलकजीवनामककविविबुधकृतौ नलानन्दनाटके
नलराज्याभिषेको नाम सप्तमोऽङ्कः ॥

Subject: Nalānanda. 1-7 acts.

Remarks:—The Ms. is in a fairly good condition.

The author of this Drama, Nalānanda is one Jīva of whom nothing more is known except that he belonged to the Bhāradvāja gotra and that he was the son of some chief, probably a Zamindar, by name Koneri. The work deals with the story of Nala and how he regained the lost throne. The work is not available in print.

॥ नलानन्दम् ॥

4370. NALĀNANDAM.

Burnell's Catalogue No. 10685. a Page 171. Left column.

Substance—Palm leaf. Size—10¾ × 1¼ inches. Leaves—38. Lines—4 to a Page. Script—Telugu. No. of Granthas—620. Author—Jīva. Complete.

Beginning, end, colophon and subject—Same as No. 4369.

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is

'धनञ्जयव्यायोगः'

॥ नागानन्दम् ॥

4371. NĀGĀNANDAM.

Burnell's Catalogue No. 5202. Page 169. Left column. Substance—Paper. Size—9½ × 4 inches. Sheets—48. Lines—8 to a Page. Script—Devanāgarī. No of Granthas—850. Author—Śrīharṣa. Complete.

Beginning:

ध्यानव्याजमुपेत्य चिन्तयसि कामुन्मील्य चक्षुः क्षणं
पश्यानङ्गशरातुरं जनमिमं त्रातापि नो रक्षसि ।
मिथ्याकारुणिकोऽसि निर्घृणतरस्त्वत्तः कुतोऽन्यः पुमान्
सेर्ष्यं मारवधूभिरित्यभिहितो बौद्धो जिनः पातु वः ॥

End:

वृष्टिं हृष्टशिखण्डिताण्डवकृतः काले किरन्तोम्बुदाः
कुर्वन्तु प्रतिरूढसन्ततसरित्सस्योत्तरीयां क्षितिम् ।
चिन्वानाः सुकृतानि वीतविपदो निर्मत्सरैर्मानसै-
र्मोदन्तां घनबद्धबान्धवसुहृद्गोष्ठीषु गाढं प्रजाः ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon:

इति श्रीहर्षकृते नागानन्दे पञ्चमोऽङ्कः ॥

After the colophon is found:—

लिखितमिदं नाटकं प्रजापति भवसंवत्सरे आश्विजबहुळसप्तमी आ·
दित्यवारे नागानन्दं नाम नाटकं संपूर्णम् ॥

Subject: Nāgānanda 1-5 acts.

Remarks:—The Ms. is in a fairly good condition.

The story of Nāgānanda is familiar to most of us. Jīmūtavāhana, a prince, lays down his life in order to rescue a Nāga from the clutches of a Garuḍa. The Garuḍa admires his spirit of self-sacrifice and in the end the prince as well as the dead Nāgas are restored to life.

The work is by the famous royal author, Śrīharṣa, the patron of Bāṇa Bhaṭṭa. The work has been published by the Nirnayasāgar Press, Bombay.

॥ नागानन्दम् ॥

4372. NĀGĀNANDAM.

Burnell's Catalogue No. 5203. Page 169. Left column.

Substance—Paper. Size—9⅞ × 4½ inches. Sheets—40. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—Śrīharṣa. Complete.

Beginning, end and subject—Same as No. 4371.

Colophon:

इति महाराजहर्षदेवकृतिर्नागानन्दं नाम नाटकं समाप्तम् ।
वर्षे विस्मयनाम्नि वासरपतौ प्राप्ते तुलामर्जुने
Subject: Mālatīmādhavavyākhyā 1-10 acts.

Remarks:—The Ms. is in a fairly good condition.

॥ मालतीमाधवव्याख्या ॥

4563. MĀLATĪMĀDHAVAVYĀKHYĀ.

Burnell's Catalogue No. 5187 b. Page 170. Right column.

Substance—Paper. Size—9½ × 4⅛ inches. Sheets—10. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—230. Author—Tripurārī.? Incomplete.

Beginning:

अहो सुश्लिष्टमालतीनैपथ्यलक्ष्मीविप्रलब्धनन्दनकर-
ग्रहोऽमात्यभूरिवसुमन्दिरे भगवतीसंविधानैः क्षेमेण गो-
पायितो मकरन्दः ॥

End:

कविः सप्रकरणं व्याजेन प्रशंसति । कथमिव भगव-
ति प्रतिपत्तव्यम् । अहो संवरणम् । मधुपक्रमैः मधुपायै-
र्निष्णातः कुशलः

Colophon:

दशमोऽङ्कः मालतीमाधवटीका सम्पूर्णा ॥

Subject: Mālatīmādhavaṭīkā 7-10 acts.

Remarks:—The Ms. is in a fairly good condition.

॥ मृच्छकटिकम् ॥

4564. MṚCCHAKAṬIKAM.

Burnell's Catalogue No. 5245. Page 161. Right column. Substance—Paper. Size—9⅜ × 5⅛ inces. Sheets—155. Lines—7 or 8 to a page. Script—Devanāgarī. No. of Granthas—2400. Author—Śūdraka. Complete.

Beginning:

पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानो-
रन्तः प्राणावरोधव्युपरतसकलज्ञानरुद्धेन्द्रियस्य ।
आत्मन्यात्मानमेव व्यपगतकरणं पश्यतस्तत्त्वदृष्ट्या
शम्भोर्वः पातु शून्येक्षणघटितलयब्रह्मलग्नः समाधिः ॥

End:

क्षीरिण्यः सन्तु गावः भवतु वसुमती सर्वसंपन्नसस्या
पर्जन्यः कालवर्षी सकलजनमनोनन्दिनो वान्तु वाताः ।

मोऽन्तं जन्मभाजः सततमभिमताः ब्राह्मणाः सन्तु सन्तः
श्रीमन्तः पान्तु पृथ्वीं प्रशमितरिपवो धर्मनिष्ठाश्च भूपाः ॥
इति निष्क्रान्ताः सर्वे ॥

Colophon:

संहारो नाम दशमोऽङ्कः । समाप्तं चेयं मृच्छकटिका ॥
शुभं भवतु । विकृतिनाम संवत्सरे कार्तिकशुक्लषष्ठीसोमवासरे अरुणाचलभट्टेन लिखितम् ॥

Subject: Mṛcchakaṭika 1-10 acts.

Remarks:—The Ms is in good condition.

The Mṛcchakaṭika is one of the oldest of Sanskrit dramas. The exact date of the drama is still unsettled; but it is certain that, at any rate, it is older than Vāmana of the 8th century.

The drama deals with the story of Cārudatta, once a wealthy and influential man, and his love to Vasantasenā.

The work is available in print, having been published in the Bombay Sanskrit Series.

॥ मृच्छकटिकम् ॥

4565. MṚCCHAKAṬIKAM.

Burnell's Catalogue No. 5246. Page 171. Right column.

Substance—Paper. Size—12⅜ × 5½ inches. Sheets—85. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—2400. Author—Śūdraka. Complete.

Beginning, end and subject—Same as No. 4564.

Colophon:

समाप्तश्चेयं मृच्छकटिका ॥ श्रीमाम्बशिवार्पणमस्तु ॥

प्रमाथीचनामसंवत्सरे आश्वयुजबह्चतुर्थ्यां समाप्तं ग्रन्थं तात्याभट्टला-
ण्डगेन लिखितम् ॥

Remarks:—The Ms. is in a very good condition.

॥ सङ्कल्पसूर्योदयः ॥

4566. SAṄKALPASŪRYODAYAḤ.

Burnell's Catalogue No. 10667. Page 174. Left column. Substance—Palm leaf. Size—16 × 1½ inches. Leaves—142. Lines—5 to 7 to a Page. Script—Grantha. No. of Granthas—8500. Author—Vedāntadeśika. Complete.

Beginning:

यद्भुक्तिप्रचयात्मके दिनमुखे दृष्टिक्षमः क्षेत्रिणः
क्षिप्रं संसृतिशर्वरीं क्षिपति यत्सङ्कल्पसूर्योदयः ।
तस्यैरस्त्रविभूषणैरधिगतस्वाधीननित्योन्नतिः
श्रीमानस्तु सभे समस्तत्रिपदुत्ताराय नारायणः ॥

End:

अङ्गीकुर्वन्त्वकलुषधियो नित्यमध्यात्मविद्या-
माद्यो धर्मः स्पृशतु वसुधामाशिषः पारवर्ती ।
देवः श्रीमानिरवधिदयासिन्धुरस्मन्निबन्धे
वक्ता श्रोता वचनविषयः प्रीयतां वासुदेवः ॥
इति निष्क्रान्ताः सर्वे ॥

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु सङ्कल्पसूर्योदये निःश्रेयसलाभो नाम
दशमोऽङ्कः.

Subject: Saṅkalpasūryodaya.

Remarks:—The Ms. is in a fairly good condition.

Vedānta Deśika is the author of this allegorical drama written from the point of view of the Viśiṣṭādvaitin. Deśika lived between 1200-1300 A. D.

The drama is available in print having been published from Śrirangam.

॥ सङ्कल्पसूर्योदयः ॥

4567. SAṄKALPASŪRYODAYAḤ.

Burnell's Catalogue No. 10668. Page 174. Left column. Substance—Palm leaf. Size—15⅝ × 1½ inches. Leaves—136. Lines—5 to a page. Script—Telugu. No. of Granthas—3500. Author—Vedāntadeśika. Complete.

Beginning:

श्रीमद्वेङ्कटनाथार्यः + सदा हृदि ॥

यत्कृति etc. Same as No. 4566.

End, colophon and subject—Same as No. 4566.

Remarks:—The Ms. is in a fairly good condition.

॥ सङ्कल्पसूर्योदयः ॥

4568. SAṄKALPASŪRYODAYAḤ.

Burnell's Catalogue No. 10669. Page 174. Left column. Substance—Palm leaf. Size—15 × 1¾ inches. Leaves—107. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—2500. Author—Vedāntadeśika. Incomplete. (Wants end).

Beginning: —Same as No. 4567.

End:

(नेपथ्ये)

छत्रैरुत्तम्भ्यतां चौर्दिशझटिति दिशश्चामरैराद्रियन्तां
सम्पर्कोद्दन्वदूर्मिध्वनिमुखरमुखस्ताड्यतां वाद्यवर्गः ।
कार्यन्तां लोकपालाः क्षणरुचिपटली विभ्रमैर्हेमवेत्रैः
.... ॥

Colophon: (Leaf No. 105)

इति सप्तमोऽङ्कः ।

Subject: Saṅkalpasūryodaya 1-8 acts.

Remarks:—The Ms. is in a fairly good condition. The Ms. abruptly ends in the middle of the 8th act.

॥ सङ्कल्पसूर्योदयव्याख्या ॥

4569. SAṄKALPASŪRYODAYAVYĀKHYĀ.

Burnell's Catalogue No. 10670. Page 174. Left column. Substance—Palm leaf. Size—16¾ × 1⅛ inches. Leaves —190. Lines—6 to 8 to a Page. Script—Grantha. No. of Granthas—5000. Author—Tātārya. Complete.

Beginning:

शुक्लाम्बरधरं + शान्तये ।

यत्पादाम्भोजयुगले मनो मे षट्पदायते ।
शठारियतिराजन्तं राजन्तं शरणं भजे ॥

सत्यानुषक्तहृदयं क्षमया च मयाश्रितम् ।
श्रीमन्नारायणमुनिं वन्दे कृष्णमिवापरम् ॥

तातयाचार्यचरणौ प्रपद्ये शरणं सदा ।
यदीयरजसा शान्तं रजो मे मूर्ध्नि भास्वता ।।
ममातिसाहसं सन्तः क्षन्तुमर्हन्ति साम्प्रतम् ।
यद्वेदान्तगुरोर्वाचां कृता व्याख्याविडम्बना ॥

इह खलु श्रीरङ्गराजदिव्याज्ञालब्धवेदान्ताचार्यापर-नामा सर्वतन्त्रस्वतन्त्रकवितार्किकसिंहः श्रीमद्वेङ्कटनाथा-चार्यः कृपया भवदहनदह्यमानं

* *

शारीरकशास्त्रप्रमेयजातं सङ्कल्पसूर्योदयाख्यप्रकरणरूपे-णोज्जगार ॥ तस्यायमाद्यः श्लोकः ॥ यद्भक्तीत्यादि ॥

End:

आत्मा श्लाघा वचनपरैरन्यैः किं किं प्रयोजनम् ।...
...न्धं निर्मितवन्तः सन्तः सारग्राहिणः सन्तुष्यन्त्येवे-त्यर्थः ।

Colophon:

इति कौशिककुलतिलकतातार्यकृतिषु सङ्कल्पसूर्योदयवि-वरणे दशमोऽङ्कः ॥

Subject: Saṅkalpasūryodayavyākhyā otherwise known as Vivaraṇa. 1-10 acts.

Remarks:—The Ms. is in a decaying condition.

A paper transcript of this work is available in this library. See T. V. No. 473.

This commentary is not available in print.

॥ सङ्कल्पसूर्योदयव्याख्या ॥

4570. SAṄKALPASŪRYODAYAVYĀKHYĀ.

Burnell's Catalogue No. 10671. Errata Page XII.

Substance—Palm leaf. Size—15×1¼ inches. Leaves—89. Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—1100 Author—Tātayārya. Incomplete.

Beginning:

पार्श्वरत्नशैलमाश्रिता कमलापतिचरणकमलसमर्चनयो-
ग्यानि काञ्चनपद्मान्युपाहर्तुमाज्ञाप्य शोभनैकतानहृदया
सुखं तिष्ठन्ति ।

End:

प्राच्यः प्राचीनः । अनुकम्पानिघ्ना कृपापरतन्त्रा
भावनालम्बनार्हं ध्यानाश्रययोग्यं कृतमलम्

Colophon:

इति सङ्कल्पसूर्योदयविवरणं सप्तमोऽङ्कः ।

Subject: Saṅkalpasūryodayavyākhyā otherwise known as Vivaraṇa 2-7 acts.

Remarks:—The Ms. is in a decaying condition. This Ms. abruptly begins in the second act and ends with the seventh act. This is noticed by Dr. Burnell in the errata list.

॥ सङ्कल्पसूर्योदयव्याख्या ॥

4571. SAṄKALPASŪRYODAYAVYĀKHYĀ.

Burnell's Catalogue No. 10672. Errata Page XII.

Substance—Palm leaf. Size—8½×1½ inches. Leaves—56. Lines—6 to a Page. Script—Telugu. No. of Granthas—

1100. Author—Tātayārya. Incomplete.

Beginning, end, colophon and subject—Same as No. 4570.

Remarks :—The Ms. is in a decaying condition.

This is noticed by Dr Burnell in his Errata list.

॥ भाणाः ॥

BHĀṆAS.

॥ अनङ्गजीवनभाणः ॥

4572. ANAṄGAJĪVANABHĀṆAḤ.

Burnell's Catalogue No. 5281. Page 167. Left column. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{1}{10}$ inches. Sheets—34. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Varadakavi. Complete.

Beginning:

श्रीमृत्युञ्जयाय नमः ।

कृष्णस्य व्रजयोषिदंबरमुषः कुन्दप्रवालङ्कृतेः

पायाद्वः प्रतिबिंबमम्बुनि धृतं भानोर्दुहित्रा चिरम् ।

व्यातेनुः प्लवनच्छलाद्विवसना यस्योपरि प्रस्फुर-

द्वेगोश्लिष्टनितम्बबिम्बमुपुमं वीरायितं गोपिकाः ॥

(नान्द्यन्ते) सूत्रधारः—

आदिष्टोस्मि भूमण्डलमण्डनायमानतोण्डीरमण्डलवास्तव्यसमस्तजनाश्चर्यतपश्चर्याफलस्य फलभरावनम्रक्रमुककदलीक्रमुकपनसनालिकेरपालिकेरितमन्दपवनकन्दलवलनतरलितबकुलवकुलकुन्दकुटजमन्दारकोविदारकदंबमुखतरुकदम्बनिबिडतटयुगलवेगापगामृदुलतरतरङ्गतालवृन्तभ्रमितरतिरभसपरिश्रमपरिसरनिकुञ्जमञ्जुलविहरणरसिकतरुणमिथुनसमाराधितमन्मथदेवतायाः भूतलावतीर्णदेवाधिरा-

नाम कविः ॥ स किल सकलजनहृदयङ्गममनङ्गजीवनं नाम भाणमभाणीत् ॥ स एवायमधुना सामाजिकहृदयसंवननसामग्री ।

End:

इति निष्क्रान्तास्सर्वे ॥

पौत्रो यज्वोत्तमश्रीवरदगुरुकवेर्वाजपेयाग्निचित्या-
सर्वस्तोमातिरात्रप्रमुखमखशुचेश्श्रीनिवासार्यसूनुः ।
तारुण्ये चाग्निहोत्री दिशि विततयशाः तर्कतन्त्रस्वतन्त्रः
स्वाधीनो वाचि धीमान् वरदकविवरो भाणमेतं व्यतानीत् ॥

Colophon:

इत्यात्रेयवरदकविकृतिरनङ्गजीवनं नाम भाणः समाप्तः ॥
श्रीमृत्युंजयार्पणमस्तु ।

Subject: Anaṅgajīvanabhāṇa.

Remarks:—The Ms. is in good condition.

The author of this bhāṇa, Varadārya was the younger brother of the father of Venkaṭācarya, the author of the Viśvaguṇādarśa. He belonged to the Ātreya gotra and was a near relation of Tatācārya. The author should have lived in the middle of the 16th century.

The work deals with the love of Vāsantikā and Vasantaśekhara. The work is not available in print.

The Bhāṇas as a rule deal with the social and moral drawbacks of the people with a view to give the people an opportunity to rectify themselves. All the bhāṇas are devoted to the elucidation of the ways of immoral conjugal happiness, so that people may detect those means and put a stop to them.

जसेवाभिलाषसमागतसुरपुरसुन्दरीबृन्दरीतिहरणनिपुणरम-णीजनशरणीकृतरमणीयतरमणिमयविमानसमानलसमानरसौधायाः बहुलमृगमदपरिमळकृतानिगळपुष्पन्धयनीरन्ध्रगन्धापणकृतविहारपणबन्धवरतरुणबृन्दनिरन्तरशृङ्गाटकायाः विटविदूषकपीठमर्दसञ्चारसंमर्दमनोहरायाः काञ्चीनगर्याः निरुपमालङ्कारनायकमणेः चतुर्भुजस्तंभगम्भीरवक्षस्थलवलभीपरिष्कारपञ्चशरविद्यासिद्धान्तस्य श्वतधृतिहयमेधहव्यसुरभिलाधरपल्लवस्य निस्तुलहस्तिगिरिमस्तवास्तव्यभगवतो देवराजस्य वसन्तयात्रोत्सवसेवासमवेतैः निखिलविद्याविशारदैः पारिषदैः ॥

यदुत—

शृङ्गाररसजीवातुश्रुतिजिह्वारसायनम् ।
कालानुरूपं भवता रूपकं रूप्यतामिति ॥

किं तादृशं रूपकम् ? (स्मृतिमभिनीय)

अस्ति हि—

शिथिलितकुमतौघः श्रीनिवासार्यनामा
सकलगुणसरस्वानन्वितो न्यावतंसः ।
सगुदितनिजकीर्तिः स्वर्नदीहंसहेलां
वहति किल यदीयं वाजपेयातपत्रम् ॥

तस्य किल तनयो विनयोदयविलासितशारदो वरदो

नाम कविः ॥ स किल सकलजनहृदयङ्गममनङ्गजीवनं नाम भाणमभाणीत् ॥ स एवायमधुना सामाजिकहृदयसंवननसामग्री ।

End:

इति निष्क्रान्तास्सर्वे ॥

पौत्रो यज्वोत्तमश्रीवरदगुरुकवेर्वाजपेयाग्निचित्वा-
सर्वस्तोमातिरात्रप्रमुखमखशुचेश्श्रीनिवासार्यसूनुः ।
तारुण्ये चाग्निहोत्री दिशि विततयशाः तर्कतन्त्रस्वतन्त्रः
स्वाधीनो वाचि धीमान् वरदकविवरो भाणमेतं व्यतानीत् ॥

Colophon:

इत्यात्रेयवरदकविकृतिरनङ्गजीवनं नाम भाणः समाप्तः ॥
श्रीमृत्युंजयार्पणमस्तु ।

Subject: Anaṅgajīvanabhāṇa.

Remarks:—The Ms. is in good condition.

The author of this bhāṇa, Varadārya was the younger brother of the father of Venkaṭācarya, the author of the Viśvaguṇādarśa. He belonged to the Ātreya gotra and was a near relation of Tatācārya. The author should have lived in the middle of the 16th century.

The work deals with the love of Vāsantikā and Vasantaśekhara. The work is not available in print.

The Bhāṇas as a rule deal with the social and moral drawbacks of the people with a view to give the people an opportunity to rectify themselves. All the bhāṇas are devoted to the elucidation of the ways of immoral conjugal happiness, so that people may detect those means and put a stop to them.

॥ अनङ्गजीवनभाणः ॥

4573. ANAṄGAJĪVANABHĀṆAḤ.

Burnell's Catalogue No. 5282. Page 167. Left column. Substance—Paper. Size—$9\frac{3}{4} \times 4\frac{1}{10}$ inches. Sheets—22. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Varadakavi. Complete.

Beginning, end, colophon and subject—Same as No. 4572.

Remarks:—

The following verses are found at the end of th Ms.

कतिपयपदबन्धैः कन्दलप्रौढिमानः

कति कति कविपागाः जाग्रति क्ष्माभराय ।

श्रुतिपुटसुखयोग्यौ सूक्तिरण्णावयेन्दोः

सुरभयति दिगन्तान् सूचितानेकभावाः ॥

क्रूरैः कुकविताशल्यैः श्रोभ्यमाणहृदां सताम् ।

वि. . . . नीं विष्णो वाणीमण्णावयार्ये ते ॥

The Ms. is in good condition.

॥ अनङ्गजीवनभाणः ॥

4574. ANAṄGAJĪVANABHĀṆAḤ.

Burnell's Catalogue No. 10345 (a). Page 167. Left column. Substance—Palm leaf. Size—$15\frac{1}{4} \times 1\frac{1}{10}$ inches. Leaves—26. Lines—6-7 to a Page. Script—Grantha. No. of Granthas—600. Author—Varadārya. Complete.

Beginning, end, colophon and subject—Same as No. 4572.

Remarks:—The Ms. is in a damaged condition.

॥ अनङ्गजीवनभाणः ॥

4575. ANAṄGAJĪVANABHĀṆAḤ.

Burnell's Catalogue No. 10645 (b). Page 167. Left column. Substance—Palm leaf. Size—$16\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—18. Lines—7-8 to a Page. Script—Grantha. No. of Granthas—600. Author—Varadārya. Complete.

Beginning and subject—Same as No. 4572.

End:

तथापीदमस्तु भरतवाक्यम्—

भूयादियं.............

...............लोकः ।

दारिद्र्यमुज्झितकवीन्द्रकुटुम्बवासं

ऊष्वत्रास्पदं भवतु लोभगुणैर्नृपाणाम् ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon: Nil.

Remarks:--The Ms. is in a decaying condition.

After the colophon is found:

दुर्मुखिसंवत्सरे वसन्ततौ चैत्रमासं कृष्णपक्षे बुध.... ॥

॥ अनङ्गजीवनभाणः ॥

4576. ANAṄGAJĪVANABHĀṆAḤ.

Burnell's Catalogue No. 10646. (a) Page 167. Left column. Substance—Palm leaf. Size—$14\frac{1}{2} \times 1\frac{3}{8}$ inches. Leaves—25. Lines—7-8 to a Page. Script—Grantha. No. of Granthas—550. Author—Varadārya. Incomplete.

Beginning—Same as No. 4572.

End:

राघा किं वदति । राघे जीवनकृतापराधे सर्वमिदमनु-

भुङ्क्ष्व ॥

Colophon: Nil.

Subject—Same as No. 4572.

Remarks:—The Ms. breaks off abruptly towards the end.

The Ms. is in good condition. There are some loose and fragmentary leaves at the end dealing with Sarpaśānti.

॥ अनङ्गविजयभाणः ॥

4577. ANAṄGAVIJAYABHĀṆAḤ.

Burnell's Catalogue No. 5280. Page 167. Left column.

Substance—Paper. Size—$10\frac{1}{8}\times4\frac{1}{8}$ inches. Sheets—45. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—750. Author—Jagannātha. Complete.

Beginning:

श्रीगुरुभ्यो नमः । शुभमस्तु । ॐ ।

सीतापाणिग्रहणसमये वर्धमानान्तरङ्ग-

प्रेमव्रीडासरळतरळैर्मन्दहासाभिरामैः ।

मुग्धापाङ्गैः समयकुतुकं दृश्यमानस्तयासा-

वुन्निद्रं वः कलयतु सदा रामभद्रः स भद्रम् ॥

* * *

(प्रविश्य) पारिपार्श्वकः । भाव एषोऽस्मि ।

सूत्रधारः ॥ अत्र खलु तञ्जानगरे कञ्जासनपुरशा-

सनपाकशासनवन्दितचरणारविन्दस्य निखिलजनान-

श्रीनिवासकावलधीरो नाम ।

त्रेतायां रघुनायकः समभवद्यः कोसलाधीश्वरः
पश्चादद्य कलौ शरीभाजिमहीनाथावतारस्स्वयम् ।
आसीत्कोसलवंशमण्डनमणिः सोऽभ्येत्य निश्चिततां
यस्मिन् जाग्रति मन्त्रिणि प्रियतमे नक्तंदिवं मोदते ॥

आः, किंतस्य भोसलकुलतिलकसचिवशिखामणे-
स्तनयः । तर्हि ज्ञायत एव, शैलशृङ्गनिहितदीपो हि
जगन्नाथधीरो नाम ॥

End:

तथापीदमस्तु भरतवाक्यम्—

भद्रं कामिजनस्य मन्मथमहावीरस्य नित्यं जय-
श्रीपूर्णा परिपूर्णता च जगतां भूयादविच्छेदिनी ।
शृङ्गारेण रसेन मन्मथमहासाम्राज्यसाचिव्यम-
प्येषां चन्द्रवसन्तमन्दमरुतामन्यूनतो वर्धताम् ॥

॥ इति निष्क्रान्ताः सर्वे ॥

Colophon:

इतिमत्कावलवंशालङ्कारभूतस्य सकलविद्याविशारदस्य श्रीमच्छ्रीनिवा-
सपण्डितस्य तनयेन जगन्नाथपण्डितेन विरचितः शृङ्गारतरङ्गिणी-
सहोदरः अनङ्गविजयो नाम भाणः समाप्तः

Subject: Anaṅgavijayabhāṇa.

Remarks:—The Ms. is in good condition. A transcript of this work is available in this library, for wich, see Transcript volume No. 486.

Jagannātha is already familiar to us as the author of the

Śarabharājavilāsa, described under No. 4241. (Vol. VII-pp. 3291-98). The present bhāṇa is from the pen of the same author. Another work by name Śṛṅgārataraṅgiṇī seems to have been composed by him. For further remarks see under No. 4241. The work has not yet been printed.

|| अनङ्गविजयभाणः ||

4578. ANAṄGAVIJAYABHĀṆAḤ.

Burnell's Catalogue No. 5279. Page 167. Left column. Substance—Paper. Size—$9\frac{3}{4} \times 3\frac{3}{8}$ inches. Sheets—48. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—700. Author—Jagannātha. Complete.

Beginning:

।

...ध्वजस्य महिता मूर्तेव कीर्तिः स्वयम् ॥

(पुनः स्मरणमभिनीय) (सहर्षोल्लासं) । अये तस्या विलासिन्या विलासविलासितमेकैकमेव संभ्रामयतीव मे हृदयम् ॥

End, colophon and subject—Same as No. 4577.

Remarks:—The Ms. is in a fairly good condition.

|| अनङ्गविजयः ||

4579. ANAṄGAVIJAYAḤ.

J. L. Collection No. 659. Substance—Paper. Size—$9\frac{1}{2} \times 4$

inches. Sheets—62. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—860. Author—Jagannātha. Incomplete.

Beginning—Same as No. 4577.

End:

आमग्रोन्नतपीवरस्तनयुगं देह्यङ्कपालीं सकृ-
ल्लज्जां मुञ्च मरालमन्दगमने मा पश्य भूमीतलम् ।
दासे त्वं मयि तावके सन्निधमायाते बिभेषीह किं
गूढस्मेरमिदं मुखं नमयसे कृत्वा करं स्वस्तिकाम् ॥
किं वेणी तमसाऽस्य सन्निधिवशात्त्वद्वक्त्रचन्द्रोऽभज-
द्वैवर्ण्यं तत एव........................... ॥

Subject: Anaṅgavijayabhāṇa.

Remarks:—The Ms. is in a fairly good condition.

॥ अनङ्गसर्वस्वभाणः

4580. ANAṄGASARVASVABHĀṆAḤ.

Burnell's Catalogue No. 10644. Page 167. Left column. Substance—Palm leaf. Size—15 × 1¼ inches. Leaves—24 (50-73). Lines—5 to a Page. Script—Telugu. No. of Granthas—380. Author—Lakṣmīnṛsiṁha. Complete.

Beginning:

केळीवने निशि शशिद्युतिरञ्जिताया-
माळीजनैः सह सहासमुखो मुरारिः ।
रासोत्सवैकरसिको रमणीयरूपो-
ल्लासोऽनिशं भवतु वः कुशलाय देवः ॥

End

श्रीमानिन्दुमुखीकटाक्षवसतिः श्रीमानिनीनन्दनः
पासादस्तु कृपाङ्कुरो भगवतो मायानृसिंहाकृतेः ।
वाणीनूपुरमंजुशिञ्जितनिभा वाणी कवीनां जये-
देतत्काव्यवरस्य जीवतु चिरं कर्ता कविः कोविदः ॥

Colophon:

इति श्रीमद्वसिष्ठवंशवाराशिकौस्तुभस्य स्वातीनृसिंहाचार्य-
नन्दनस्य लक्ष्मीनृसिंहाचार्यकवेः कृतिषु अनंगसर्वस्व
नाम भाणः संपूर्णः ॥

Subject: Anaṅgasarvasvabhāṇaḥ.

Remarks:—The Ms. is in good condition.

This author belonged to the Vāsiṣṭhagotra and was the son of one Svātī Nṛsimhācārya. His date is not known. The bhāṇa is not available in print.

॥ कन्दर्पदर्पणम् ॥

4581. KANDARPADARPAṆAM.

Burnell's Catalogue No. 5278. Page 167. Right column.

Substance—Paper. Size—$9\frac{1}{2} \times 4$ inches. Sheets—15. Lines—8 to 10 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Śrīkaṇṭha. Complete.

Beginning:

यस्य प्राणसुखाः शराः श्रुतिसुखी मौर्वी रसज्ञप्रियं
कोदण्डं नयनोत्सवं प्रियसखः स्पर्शाभिनन्द्यो रसः ।
चेतःप्रीतिकरी जनिर्निखिलजगतीहृद्यश्च बाह्वोर्बलं
सोऽयं पञ्चशरस्तनोतु भवतां सौभाग्यमव्याहतम् ॥

(नान्द्यन्ते) सूत्रधारः ॥

अहह फलितमस्मदध्यवसायेन । यदिदानीम् । कम्पानदीतटस्वास्तव्यस्य कात्यायनीस्तनमुद्रितोरस्थलस्य भगवतः श्रीमदेकाम्रनाथस्य वसन्तयात्रोत्सवसमागतानां सज्ञातसाहित्यसौहित्यानामङ्गीकृतसङ्गीतानामनङ्गावेद्याराद्रान्तितानामुपस्थितः समाजः ॥

काञ्ची पुरी वसन्तः कालः सरसाश्च यत्सभास्ताराः ।
तत्पुनरारब्धव्यं रूपकमस्माभिरनुरूपम् ॥

(विचार्य सहर्षम्) अस्ति खलु प्रशस्तमहिमा समस्तविद्यापारदृश्वा काश्यपकुलललामभूतः कलियुगकालिदाससूनुः बलयाङ्कनखचरणकनकचरणमृगाङ्कमण्डितशिराः श्रीकण्ठो नाम कविः ॥ तस्य कृतिं कन्दर्पदर्पणं नाम भाणं प्रयोगेन प्रदर्शयन् प्रीणयिष्याम्यार्यमिश्रान् ॥

End:

तथापीदमस्तु भरतवाक्यम् ॥

मर्यादावरणं जनस्य महतो वर्णासमेवर्ततां(?)
सस्यैः पूर्णरसादिभिः समधिका सर्वंसहा जायताम् ।
सादेशे भुवनत्रये रतिपतेरव्याहतो वर्धतां
चित्ते पुण्यवतां शिवस्य चरणद्वन्द्वं परिस्पन्दताम् ॥

Colophon:

इति ॥

कन्दर्पदर्पणं नाम भाणं श्रवणभूषणम् ।
श्रोतॄणामर्थशब्दानां पूर्णं निर्धूतदूषणम् ॥

श्रीमदनङ्गरङ्गसिंहाङ्गकुलहंसे नमः ॥

Subject: Kandarpadarpaṇabhāṇa,

Remarks:—The Ms. is in good condition. The Ms. is full of scriptorial blunders.

Śrīkaṇṭha, the author of this bhāṇa belonged to the Kāśyapagotra and seems to have been a native of Kāñcīpura. The bhāṇa was intended to be acted before an audience which gathered in Kāñcī during the Vasantotsava of Ekāmranātha. He refers to his father as Kaliyuga Kālidāsa.

The drama is not available in print.

॥ कन्दर्पदर्पणभाणः ॥

4582. KANDARPADARPAṆABHĀṆAḤ.

Burnell's Catalogue No. 10643. Page 167. Right column. Substance—Palm leaf. Size—15×1½ inches. Leaves —18 (74-91). Lines—5 to a Page. Script—Telugu. No. of Granthas—300. Author—Śrīkaṇṭha. Complete.

Beginning, end, colophon and subject—Same as No. 4581.

Remarks:—The Ms. is in a fairly good condition.

॥ गोपाललीलार्णवः ॥

4583. GOPĀLALĪLĀRṆAVAḤ.

Burnell's Catalogue No. 5321. Page 168. Right column. Substance—Paper. Size—10¾×4½ inches. Sheets —50. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Govindakavi. Complete.

Beginning:

क्रीडानिर्भरमीलितेक्षणमतिश्वासोद्गमप्रस्फुर-
द्वक्षोजद्वितयं विलोलकबरीप्रच्छादितांसाननम् ।
व्रीलावनमितोत्तमाङ्गमनिशं सस्मेरवक्त्राम्बुजं
रत्यास्तत्सुरतान्तकान्तिरुचिरं भूयाद्वपुः श्रेयसे ॥

॥ नान्द्यन्ते सूत्रधारः ॥

(सर्वतो विलोक्य) । कथमिदानीं भगवतः श्रीनिवासस्यास्थानोत्सवदर्शनाय मिलिता एव पारिषदाः । तदेतानित्थं विज्ञापयामि (अञ्जलिं बध्वा) । भो भो एष भरताचार्यपुत्रोऽहमवहितोऽस्मि भवदाराधने । तदुच्यतां कस्मिन्नुत्कण्ठिताः तत्रभवताश्चित्तवृत्तिः (कर्णं दत्वा) किं ब्रूथ ।

जामात्रादिजनस्य चेष्टितमभिव्यक्तीचकाराखिलं
यत्र श्रीः कमलापतेः सुचरितं सामर्थ्यमप्यात्मनः ।
गोविन्दाख्यसुहृत्कृतेयमुटके गोविन्दनामा कविः
प्राणैषीदधुनैव भाणमतुलं गोपाललीलार्णवम् ॥

* * *

नटी ॥ (सशिरः कम्पम्) । आर्य क ईदृशः कविः
यस्य लोकोत्तरा धृतिः प्रगल्भता च ।

सू ॥ गोविन्दकविरेव ।

नटी ॥ (स्तब्धं तूष्णीं तिष्ठति) ।

सूत्र ॥ (सप्रणयकोपम्) अयि प्रेयसि ।

तातो यस्य दिगन्तविश्रुतयशाः श्रीरङ्गवर्याभिधो
माता यस्य सरस्वती सुचरिता साध्वीनुवैताइशोः ।

पित्रोः सूनुषु च त्रिषु प्रियतरो योऽपि स्वयं मध्यमः
किं वानागत एष ते श्रुतिपथं गोविन्दनामा कविः ॥ ५६ ॥

End:

तथापीदमस्तु भरतवाक्यम् ॥

नन्दन्तु प्रथिता नृपाः सुकवयो विप्राः परे साधवः
नन्दत्वेष कविश्चिरं विरचयन्ग्रन्थान्मनोज्ञान् बहून् ।
ये त्वस्यासुहृदः निरक्षरमुखा द्रव्याङ्गनासूनुभि-
र्युक्तास्ते भवने स्वके भृशतरां नन्दन्तु नक्तंदिवम् ॥

॥ इति सर्वे निष्क्रान्ताः ॥

Colophon:

इति श्रीमदुटके रङ्गाचार्यतनयगोविन्दकविकृतौ
गोपाललीलार्णवभाणः समाप्तः ॥

गोपाललीलाभाणो मे सत्पुत्रोऽह्यभिवर्धताम् ।
सन्तापयन्नन्तरङ्गमनिशं मम दुर्हृदाम् ॥ १ ॥

Subject: Gopālalīlārṇavabhāṇa.

Remarks:—The Ms. is in a very good condition.

Govinda is the author of this Bhāṇa. He tells us that he is the son of Raṅgācārya and Sarasvatī. The appellation Uṭke seems to suggest that the author might have been a Maharaṭna Brahmin but it is not certain. The date etc. of the author is not known. The work is not available in print.

॥ दानकेलिकौमुदी ॥

4584. DĀNAKELIKAUMUDĪ.

Burnell's Catalogue No. 5200. Page 168. Right column.

Substance—Paper. Size—13×5½ inches. Sheets—23. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—900. Author—? Complete.

Beginning:

॥ नमो व्रजयुवराजाय ॥

अन्तस्मेरतयोज्ज्वला जलकणव्याकीर्णपक्ष्माङ्कुरा
किञ्चित्पाटलिताञ्चला रसिकतोत्सिक्ता पुरः कुञ्चती ।
रुद्धायाः पथि माधवेन मधुरव्याभुग्नतारोत्तरा
राधीया किलकिञ्चितस्तबकिनी दृष्टिः श्रियं नः क्रियात् ॥

॥ अपि च ॥

विधुरपि कलयन् सदाभिवृद्धिं
गुरुरपि गौरवचर्यया विहीनः ।
मुहुरुपचितवक्रिमापि शुद्धो
जयति मुरद्विषि राधिकानुरागः ॥

॥ नान्द्यन्ते सूत्रधारः ॥

अलमतिविस्तरेण ॥ (समन्ताद्विलोक्य ।) हन्त कथं मदथिनान्दीचन्द्रिकासन्दीपितचावर्तत (?) धुरं.......नन्दीश्वरगिरेरुपत्यकायां घूर्णते सतां मण्डली ॥

End:

कृष्णः ॥ (सहर्षम्) । भगवति शीघ्रमाज्ञापय किन्ते भूयः प्रियङ्करवाणीति ॥

पौर्ण निरवद्यकेलिमाधुरीसुधासिन्धो साधीयासि प्रसङ्गे कृताद्य्प्रार्थनानिश्चितमेव फलगर्भिणी भवेदित्यधुना निवेदयामि ।

सहचरीकुलसङ्कुलया गुणै-
रविक्रया सह(रा) धिक्रयानया ।
त्वमिह नर्मसुहृन्मिलितस्तदा
घटय माधव हृद्यविलासितम् ॥
॥ किञ्च ॥
राधाकुंड(?)तटीकुटीरवसतिस्त्यक्तान्यकर्मा जनः
सेवामेव समक्षमत्र युवयोर्यः कर्तुमुत्कण्ठते ।
वृन्दारण्यसमृद्धिदोहदपदक्रीडाकटाक्षद्युते-
स्तर्षाख्यस्तदुरस्य माधव...तूर्णं विधेयस्त्वया ॥
(कृष्णः ॥ सहर्षाभ्युपगमम्) । भगवति तथास्तु ।
तदेहि प्रातिस्विकाभीष्टकृत्याय प्रयाम इति ॥

Colophon:
दानकेलिकौमुदीनाम भाणिका समाप्ता ॥

प्रथिता सुमनःसुखदा यस्य निदर्शेन भाणिकाप्यागियम् ।
तस्य मम प्रियसुहृदः कण्ठतटीमुपमलङ्कुरुताम् ॥
नन्दीश्वरे निवसता भाणिकेयं विनिर्मिता ।
गते मनुशते शाके चन्द्रस्वरसमन्विते ॥ १४७१ ॥

Subject: Dānakelikaumudī.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given the following verses:—

अथ भाणिकालक्षणम् ।
भाणिक....क्ष (भाणिका श्लक्ष्ण)नेपथ्यामुखनिर्वहणान्विता ।
भारती कैशिकी वृत्तियुजैकाङ्कविनिर्मिता ॥
उदात्तनायिकामन्जुपुरुषाङ्कस....प्रकम् ।
उपन्यासोऽथ विन्यासो विबोधः साध्वसं तथा ॥

समर्पणं निवृत्तिश्च संहारश्चापि सप्तमः ॥

उपन्यासः प्रसङ्गेन भवेत्कार्यस्य कीर्तनम् ।

निर्वेदवाक्यव्युत्पत्तिविन्यास इति कीर्त्यते ॥

भ्रान्तिनाशो विबोधः स्यान्मिथ्याख्यानन्तु साध्वसम् ॥

उपालम्भवचः कोपपीडयेह समर्पणम् ।

निदर्शनस्योपन्यासो निवृत्तिरिति कथ्यते ।

संहार इति च प्राहुः यः कार्यस्य समापनम् ॥

On the title page is given

'श्रीसर्वविद्यानिधानमहादेवकवीन्द्राचार्यसरस्वतीनां दानकेलिकौमुदी-
भाणिका' ॥

This bhāṇa refers to the amorous deeds of Lord Śrī Kṛṣṇa with the Gopikās. The author of this work is unknown but he says that he composed the bhāṇa in Śaka 1471, corresponding to A. D. 1549. A place called Nandīśvara seems to have been his native place.

The present copy belonged to the collection of the famous Kavīndrācārya and is dated Saṃvat 1740, corresponding to A. D. 1682.

Professor A. B. Keith attributes this bhāṇa to Rūpagosvāmin, the famous Ālankārika and follower of Caitanya but on what grounds he does so is not stated. The bhāṇa was printed as early as 1881 at Murshidabad in N. India.

॥ मदनभूषणम् ॥

4585. MADANABHŪṢAṆAM.

Burnell's Catalogue No. 10653. Page 170. Left column.

Substance—Palm leaf. Size—17¾ × 1⅛ inches. Leaves—31. Lines—4 to 6 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Appāyajvan. Complete.

Beginning:

भजन्तु लोका भवमम्बुजाक्षं
पद्मासनं वा पुरुषार्थहेतोः ।
वयं वयोरूपगुणाभिरामं
रामाङ्कमाश्रित्य सुखं भजामः ॥

येनैवोपमितिं गतास्त्रिजगतामादर्शपद्मेन्दवः
वर्ण्यन्ते कविभिर्वरेण्यमहिमप्रस्कान्दितान्याश्रियः ।
येनानङ्गदशां गतोऽपि मदनः पट्टाभिषिक्तः पदे
तत्तादृग्वदनं तनोतु सुदृशामानन्दमव्याहतम् ॥

*   *   *

॥ नान्द्यन्ते सूत्रधारः ॥

अद्य खलु जगत्पतेः करुणानिलयस्य कपर्दाकलितकलाधीशकलाविलासविशदचोलावनीमण्डलस्य कवेरकन्यकालोलकल्लोलमालाविघट्टनविघटितशीकरनिकरापहृतसन्ध्यानन्दनटनविनोदपरिश्रमस्य गोपायितगुणगणमहितनिखिलविद्वज्जनस्य भगवतो गौरीमायूरनाथस्य वर्धते वसन्तोत्सवः

*   *   *

पारिपार्श्वकः ॥ अस्ति जानामि ।

तातो यस्य चिदम्बरेश्वर इति प्रख्यातनामा मखी

भद्रार्त्रिदिवदत्तहव्यनिवहा दानैककृत्याः सुराः ।
श्रीवत्सान्वयवारिधीन्दुरतसयः किल्लियूर्नामनि
श्रीमान् विश्रुतकीर्तिरार्द्रहृदयः पुण्येऽग्रहारे सुधीः ॥

अथ खलु तत्तनयो गौरीमायूरनगरमध्यास्ते ।

सूत्र ॥ (साभ्युपगमम्) । प्रख्यातविद्याः खलु तद्वंशीया जगत्याम् ।

पारि ॥ (सशिरः कम्पम्) । अस्ति किममुना कविना प्रणीतः प्रबन्धः ?

सूत्र ॥ किं न श्रुतः कविवरेण कृतस्त्वयासौ
भाणः सभाजनवशीकरणप्रवीणः ।
दुष्टदुर्जनस्य हृदयं परतो निरुन्धे
तत्राहशो मदनभूषणनामधेयः ॥

अतस्तेनैव महाजनसभाः सभाजयिष्यामः ।

End:

तथापीदमस्तु भरतवाक्यम् ॥

आचन्द्रं धर्मशीलो भवतु नरपतिः सस्यपूर्णा धरित्री
कावेरीबद्धसेतुर्भजतु जलनिधिं सर्वदैवात्मनाथम् ।
शृङ्गारश्चित्तजन्मा मलयमरुदिमे कोकिलाः कामिनीनां
सन्दोहश्चन्द्रबिम्बं रसिककुलमधो वर्धतां माधवोऽपि ॥

Colophon:

समाप्तोऽयं मदनभूषणाख्यो भाणः हरिः ॐ ॥ शुभमस्तु ॥

श्रीगुरुभ्यो नमः । साम्बशिवार्पणमस्तु ॥

Subject: Madanabhūṣaṇabhāṇa.

Remarks:—The Ms. is in a fairly good condition. The author Appāyajvan is a native of Killayūr eight miles off from Māyavaram in Tanjore District. His other works are

1. गौरीमायूरचम्पूः 2. आचारनवनीतम्

He was patronised by the King Śāhaji of Tanjore.

A paper transcript of this work is available in this library. See T. V. No. 495.

For further particulars regarding the author, see the remarks under No. 4035, Vol. VII Pages 3040-48. The work does not seem to have been printed.

॥ मदनभूषणम् ॥

4586. MADANABHŪṢAṆAM.

Burnell's Catalogue No. 10654. Page 170. Left column. Substance—Palm leaf. Size—16 × 1¼ inches. Leaves—30. Lines—6 to a Page. Script—Grantha. No. of Granthas—600. Author—Appāyajvan. Complete.

Beginning, end, colophon and subject—Same as No. 4585.

Remarks:—The Ms. is in a fairly good condition.

॥ मदनसञ्जीवनः ॥

4587. MADANASAÑJĪVANAḤ.

J. L. Collection No. 660. Substance—Paper. Size—7½ × 5 inches. Sheets—23. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—620. Author—Ghanaśyāma. Complete.

Beginning:

भद्रायास्तु सगेहेषु यद्वाहोगूढतस्करः ।
यत्र नायकनामापि लालसीति विवर्णवत् ॥ १ ॥

(नान्द्यन्ते सूत्रधारः)

(सविनयं कुसुमाञ्जलिं विकीर्य पुरोऽवलोक्य सानन्दोल्लासम् ॥)

अनुकूलयत इव विधिरस्मासु ॥ यदिदानीम् ॥

पुण्डरीकपुरवास्तव्यस्य पुण्डरीकनयनप्रमुखपुङ्खानुपुङ्खरिङ्खदसङ्ख्यनिखिललेखलेखाऽन्वमानास्थानमण्डपस्य भगवतः शिवकामिनीसखस्य कनकसभापतेरार्द्रादर्शनमहोत्सवाय मिलिताः निरन्तरछन्दःकाव्यनाटकालंकारसङ्गीतसाहितीकलानिरवद्यवैशारद्याः सततमद्वैतविद्यापारदृश्वानः द्वैतवादिमेघपुण्डरीकाः पौण्डरीकप्रभृतिमहाक्रतुकृतः त्रिसन्ध्यमिन्दुशेखरचरणारविन्दपरिचरणनिर्धूतकलिवृजिना रसिकजनाः

*

(विचिन्त्य सहर्षम् ॥)

कश्चिदस्ति भवादृशानस्वयरसिकमानसानन्दनगुणगणगर्भितो मदनसञ्जीवनो नाम भाणः । तमहं प्रयुञ्जानो अनुरञ्जयाम्यार्यमिश्रान् । (नेपथ्ये) कस्तस्य कविः

सू ॥ (सहर्षम्) श्रूयतां समासतो निवेदयामि ॥

यस्येशो + कविः ॥

(पुनर्नेपथ्ये) किं युद्धकाण्डनाम्नश्चम्पूकाव्यस्य प्रणेता घनश्यामकविः ।

सू ॥ (आकर्ण्य) ॥ (सस्मितम्) अथ किम् (ससम्भ्रममाकाशे लक्ष्यं बध्वा ॥) (ससम्भ्रमम् ॥) किं ब्रूथ । किमेष एव कविरिति ॥ (सभ्रूभङ्गम्)

* * *

सूत्र ॥ (सश्लाघम्)

दिष्ट्या इष्ट इहैव तोषणगुणः सर्वे गुणग्राहिणः
युयं व्याघ्रपुरीपुरीविभुरपि श्रीचित्सभेशो नटः ।
फुल्लश्रीरजसौरभीमधुघटीनिद्रापितद्वीपिज-
द्राक्षातादृशमाधुरी सहचरी वाचां कवेर्वैखरी ॥

किम्बहुना ॥

एकेनाह्ना कृतं तेन मयैकेन प्रयुज्यते ।
तदेकेन हृदा यूयं तरङ्गयत रूपकम् ॥

End:

कथय किं भूयः प्रियमुपकरोमि ॥
किं ब्रवीषि । नन्वितोऽपि प्रियमस्तीति ।

तथापीदमस्तु भरतवाक्यम् ॥

सर्वत्रापि सुभिक्षमेव सततं भूमण्डले वर्धतां
भक्त्या यज्ञकृतो भवन्तु सुजनाश्चन्द्रार्धचूडार्चकाः ।
श्रीमन्तः कवयो भजन्तु परितः कल्याणपारम्परी-
माचन्द्रार्कमनर्गलं विजयतामद्वैतमव्याहतम् ॥ ९८ ॥

* * *

पुंसां बाहुयुगस्य सम्भवफलं यस्याङ्कपालीरसो-
रालोको वदनस्य दन्तसिचयास्वादोनुसारः पदोः ।
पाण्योरूरुनखक्षतार्पणमुपालम्भः श्रुतं कर्णयो-
र्मूर्ध्नः पादनतानि मुग्धतरुणीलोकः समाजीर्यतु(?) ॥
पुनः समाधाय ॥ इति निष्क्रान्ताः ॥

Colophon:

सम्पूर्णो मदनसञ्जीवनो भाणः ॥

Subject: Madanasañjīvanabhāṇa.

Remarks:—The Ms. is in a fairly good condition.

On the title page is given:—

घनश्यामपण्डितीयः ॥

There is a paper transcript of this work in this library. See T. V. No. 486.

This is another wórk fróm the facile pen of Ghanaśyāma. The work is unpublished.

॥ मदनसञ्जीवनः ॥

4588. MADANASAÑJĪVANAḤ.

J. L. Collection No. 661. Substance—Paper. Size—8 × 4½ inches. Sheets—16. Lines—16 to a page. Script—Devanāgarī. No. of Granthas—500. Author—Ghanaśyāma. Incomplete.(Wants end)

Beginning—Same as No. 4587.

End:

मार्दङ्गिकादिषु पुरो विचलत्सु शीला
चेलावगुण्ठितशिरश्चरमाङ्गवाहाः ।

नाथ्याय गुल्फधृतमञ्जुलकिङ्किणीका
देवालयं द्रुतमिमाः प्रवियान्ति वेश्याः ॥ ९१ ॥
* * किन्वेतत्किमु ते कचद्युतिझरी..... ....

Subject. Madanasañjīvanabhāṇa.

Remarks:—The Ms. is in a fairly good condition.

॥ रसोल्लासः ॥

4589. RASOLLĀSAḤ.

Burnell's Catalogue No. 10652. Page 172. Right column. Substance—Palm leaf. Size—16½ × 1½ inches. Leaves—24. Lines—7 to a Page. Script—Grantha. No. of Granthas—600. Author—Śrīnivāsavedāntācārya. Complete.

Beginning:

....कारीशर-
त्सम्पूर्णामृतरश्मिसान्द्रकिरणस्रोतांसि वः सन्ततम् ।
उन्मीलन्नवकेतकीदलशिखालीलायितानि स्वयं
रत्यन्ते म......... .... ॥

(नान्द्यन्ते)

सूत्रधारः ॥ आर्ये समादिष्टोऽस्मि ॥ * निरवधिककरुणानिधेः श्रीभूतपुरीतपःफलायमानस्यादिकेशवस्योपवनयात्रोत्सव.... * अखिलैरमीभिरार्यमिश्रैः । यथा—

अस्ति ह्य.............................. ।
श्रीनिवासः कविर्यस्य वाणी विद्वन्मनोहरा ॥

॥ किञ्च ॥

विद्यावृत्तविशेषविस्मितबुधश्रेणीवितीर्णोल्लस-
द्वेदान्तार्यसमास........................... ।
तादृग्वैभवशोभिनो गुणनिधेः श्रीश्रीनिवासस्य यः
पौत्रः क्षान्तिदयाशमादिभवनं श्रीवेङ्कटार्यात्मजः ॥

* * *

तत्प्रणीतो निखिलरसिकजन.............. ।

End:

किमतोऽप्यधिकं प्रियमस्ति ॥

तथापीदमस्तु भरतवाक्यम् ॥

नयेन परिरक्षन्तु रक्षितारः क्षितेः क्षमाम् ।
सुवृष्टिर्भवतात्काले विद्वांसः प्राप्नुयुः श्रियम् ॥

Colophon:

इति वेदान्ताचार्यश्रीनिवासाचार्यस्य कृतिषु रसोल्लासो नाम भाणः
समाप्तः ॥

अत्रिवंशभववेङ्कटात्मजश्रीनिवासकविना विनिर्मितम् ।
भाणरत्नमधिकोज्वलं गुणैर्वर्तिदोषमिदमस्तु संमुदे ॥

हरिः ॐ

Subject: Rasollāsabhāṇa.

Remarks:—The Ms. is in a decaying condition.

The author of this bhāṇa, Śrīnivāsavedāntācārya seems to have been a native of Bhūtapuri, or Śrīperumbudur in the Chingleput District. He belonged to the Ātreyagotra. His geneology as given here is

Vedāntārya
|
Śrīnivāsa
|
Venkaṭārya
|
Śrīnivāsa

The hero and heroine in this bhāṇa happen to be Kāmaśekhara and Muktāvalī. The work is unpublished.

॥ वसन्ततिलकः ॥

4590. VASANTATILAKAḤ.

Burnell's Catalogue No. 5288. Page 172. Left column. Substance—Paper. Size—9¾ × 4⅛ inches. Sheets—21. Lines—10 to 13 to a Page. Script—Devanāgarī. No. of Granthas—635. Author—Varadācārya. Complete.

Beginning:

जयन्ति जगतां मातुस्तनकुङ्कुमबिन्दवः ।
मुकुन्दाश्लेषसङ्क्रान्तकौस्तुभश्रीविडम्बिनः ॥

End:

काञ्चीपुरीमधिवसन्कमनीयभूमा
कामी स एव वरदः कमलालयायाः ।
आकल्पयन्वसुमतीमनुकल्पमेनां
कल्पद्रुमो जयतु कश्चन मानवानाम् ॥
॥ इति निष्क्रान्ताः सर्वे ॥

Colophon:

इति वरदार्यविरचितो वसन्ततिलको नाम भाणः सम्पूर्णः ॥
श्रीरामाय नमः हरिः ॐ ॥

श्रीनारायणाय नमः ॥ हरिः

Subject: Vasantatilakabhāṇa.

Remarks:—The Ms. is in a good condition. The author of this work is known as Ammal Varadācārya.

Vātsyavardārya, the son of Ghaṭikāśatam Sudarśana is the author of this work. He was a native of Kāñcīpuram. The

Descriptive No.	Collection No.	Substance	Size inches	No. of Sheets or leaves
4591	B. L. 5284	Paper.	10×4¼	33
4592	„ 5285	do.	10×4¼	60
4593	„ 5286	do.	10½×5⅜	19
4594	„ 5287	do.	9⅝×3⅞	36
4595	„ 5288	do.	9½×3⅞	68
4596	„ 5289	do.	8¾×3¼	54
4597	„ 5291	do.	9¾×4	43
4598	„ 5292	do.	9¾×3⅞	46
4599	„ 10647	Palm leaf.	15×1¼	32
4600	„ 10649	do.	13×1¼	25
4601	„ 10655	do.	15½×1¼	33
4602	J. L. 662	Paper.	8¼×3½	30
4603	S. K. 218	do.	9½×4	41
4604	B. L. 5290	do.	10½×4⅝	24
4605	„ 5293	do.	10¾×4	56
4606	„ 10648	Palm leaf.	13½×1¼	28
4607	J. L. 663	Paper.	8½×5	15
4608	B. L. 5294	do.	14½×6¼	15

work has been published by the Nirṇayasāgar Press in the Kāvyamālā series.

There are a number of copies of the Vasantatilakabhāṇa in this library and they are tabulated hereunder.

No. of Lines per Page or Sheet.	Script	Complete or otherwise.
9	Devanāgarī.	Complete.
6-8	do.	„
11-13	do.	„
8	do.	„
6 or 7	do.	„
„	do.	„
7 or 8	do.	„
7	do.	„
7	Grantha.	„
6	do.	„
5	Nandināgarī.	„
10	Devanāgarī.	„
9	do.	„
10	do.	Incomplete (wants end).
5	do.	„
7	Grantha.	„ (fragment)
19	Devanāgarī.	„ (wants beginning)
13	do.	„ „

॥ शृङ्गारकोशः ॥

4609. ŚṚṄGĀRAKOŚAḤ.

Burnell's Catalogue No. 5276. Page 173. Right column. Substance—Paper. Size—9⅛×4 inches. Sheets—18. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—840. Author—Abhinava Kālidāsa. Complete.

Beginning:

श्रीगणेशाय नमः ॥

यदालोक्य स्वस्मिन्मणिमुकुरभासि स्तनतटे
स्फुरद्भृङ्गाकारं कररुहपदाशङ्किहृदया ।
सलज्जा हस्ताभ्यां स्थगयति नवोढां मुहुरुमा
स बालेन्दुः क्लान्तिं हरमकुटवासी हरतु वः ॥ १ ॥

* * *

(नान्द्यन्ते)

सूत्रधारः ॥ (परिक्रम्यावलोक्य)। हन्त फलितमस्मद्व्यवसितेन यदद्य कम्पातटग्रहमोधिनो वलयाङ्क इति प्रथितापरनामधेयस्य भगवतः कामकोटीवल्लभस्य वसन्तयात्रोत्सवप्रसङ्गेन

अधीतरतितन्त्राणामनङ्गब्रह्मवादिनाम् ।
सोऽयं विदग्धमिश्राणां समाजः समुपस्थितः ॥

* * *

अस्ति खलु काश्यपगोत्रतिलकभूतः कश्चिदभिनवकालिदासो नाम कविः ।

यस्यानमन्ति कुलदैवतमिन्दुमौलि-
मेकाम्रमूलनिलयं पतिमम्बिकायाः ।
यस्याग्रजश्च कविताकृतपट्टबन्धं
साहित्यभूषणमसोढमदं कवीनाम् ॥

तस्य कृतिं शृङ्गारकोशं नाम भाणं प्रयोगतो दर्श-
यथार्यमिश्रानुपस्थास्ये ।

End:

तथापीदमस्तु भरतवाक्यम् ॥

अतितररसायिनं भूयादनङ्गवशंवदं
हृदयमसकृच्छृङ्गाराद्वैतशृङ्खलितं नृणाम् ।
शशधरकलाचूडं श्यामारुणं करुणामयं
शमयतु पुनर्जन्मक्लेशं ममापि परं महः ॥

Colophon ;

पूर्णोऽयमभिनवकालिदासकृतिः शृङ्गारकोशं नाम भाणः ॥

॥ हरिः ॐम् ॥

यमालोक्य स्वास्मिन् मणिमुकुरभासि स्तनतटे + हरतु वः ॥

Subject: Śṛṅgārakośabhāṇa.

Remarks:—The Ms. is in good condition.

Abhinava Kālidāsa is the author of this bhāṇa. He should have had some sort of intimate connection with Kāñcīpuram; for the titular deity of the place is mentioned by the author as his favourite deity.

The principal charecters in this bhāṇa are Śṛṅgāraśekhara and Anaṅgalekhā. This is not available in print.

॥ शृङ्गारकोशः ॥

4610. ŚṚṄGĀRAKOŚAḤ.

Burnell's Catalogue No. 6217. Page 173. Right column. Substance—Paper. Size—9¾×4½ inches. Sheets—14. Lines—10 to 12 to a Page. Script—Devanāgarī. No. of Granthas—450. Author—Abhinava Kālidāsa. Complete.

Beginning, end, colophon and subject—Same as No. 4609.

Remarks:—The Ms. is in very good condition. Alternate sheets are sulpherated.

॥ शृङ्गारकोशः ॥

4611. ŚṚṄGĀRAKOŚAḤ.

Burnell's Catalogue No. 10642. Page 173. Right column. Substance—Paper. Size—15½×1¼ inches. Sheets—20. Lines—5 to 7 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Gīrvāṇendradīkṣita. Complete.

Beginning:

मध्येमनस्तमभ्येमि जगद्वीरं मनोभुवम् ।
अपि वेघोमुखा देवा यस्य वीक्षावशंवदाः ॥

* * *

(नान्द्यन्ते)

सूत्रधारः ॥ (अञ्जलिं बध्वा) । अद्य खलु समादिष्टो-
ऽस्मि सकलसामन्तराजचक्रमौलिमाणिक्यकिरणपुञ्ज-
किञ्जल्कितचरणारविन्दस्य * प्रतिवरद[व]नेहसंभव-

तमाननिजजैत्रयात्राप्रवृत्तजयकाहलीनिनादकर्णनिर्वा-
सितनिखिलारातिधरापतेर्धारावलयवलशासितुर्विशेष-
स्यावन्तिपतेः गुणलुब्धैरखिलकलाविलाससदनैः
काञ्चीपुरनेतुर्भगवतो वरदराजस्य वसन्तोत्सव-
यात्रासमागतैर्निरसूयैश्च रसिकलोकचूडामणिभिः सामा-
जिकैः ॥

अये भरताचार्य ॥

शब्दान्कानपि वर्जितान्वयकथान् सङ्गृह्य नीतत्रयाः
पद्यं पादचतुष्टयेन शनकैर्निर्माय दुर्मेधसः ।
सानन्दं विमृशन्त एव सशिरःकम्पं सरोमाञ्चम-
प्यस्मानाकुलयन्ति हन्त रसिकाभिष्कारुणं दारुणाः ॥ ४ ॥

तद्रूपकेण दरपीडितपार्विकेन्दु-
निष्यन्दिनूतनसुधारससोदरेण ।
नृत्तप्रयोगविशदाद्य रसोत्तरेण
त्वं नो विकासय मनांसि विना विलम्बम् ॥ ५ ॥ इति ॥

तत्कथमिदानीं घटताम् ॥

(ध्यानं नाटयन्) । (स्मृतिमभिनीय) ।

अस्त्यस्तोकगुणो हिमाद्रिशिखरोत्सङ्गापतज्जाह्नवी-
साहङ्कारतरङ्गसङ्गसहजश्रीहारिसूक्तिक्रमः ।
किश्चोन्मूलयितुं पुनश्च सुदृढीकर्तुं कलासु प्रभुः
सर्वज्ञो हरिदन्तविश्रुतयशाः श्रीनीलकण्ठाध्वरी ॥ ६ ॥

॥ अपि च ॥

यस्मिन्क्षोणिभुजां सभासु विदुषामग्रेसरे जातुचित्
स्वातन्त्र्यं विविधं विवृण्वति निजं सर्वासु विद्यास्वपि ।
जायन्ते गगनप्रचोदितदृशस्तथ्योपलब्धिक्रमाः
स्वेदाम्भः कणासिक्तसर्वतनवो दीनाः प्रतिद्वन्द्विनः ॥ ७ ॥

तस्य भरद्वाजकुलजलधिकौस्तुभस्य कैयटव्याख्यान-
शिवतत्त्वरहस्याद्यनेकप्रबन्धनिर्मातुरद्वैतविद्यागुरोर्भग-
वत्याः परदेवताया एव पुरुषावतारस्य पवित्रकीर्तेर्नीलक-
ण्ठमखिनस्तृतीयनन्दनेन तदीयचरणारविन्दपरिचरणल-
ब्धनिखिलविद्येन तत्पुत्रतानुगुणसाहितीकेन गीर्वाणेन्द्रे-
णाभिनवनिर्वर्तितशृङ्गारकोशो नाम भाणः इत्यधुनैव
खलु निवेदितं मधुरापुरादागतेन रङ्गकेतुना । तत्तमेव
प्रयुञ्जानः सामाजिकहृदयमनुरञ्जयामि ॥

End :

तथापीदमस्तु भरतवाक्यम्

भूयादस्खलितक्रमा रतिपतेराज्ञा कुले कामिनां
भक्तिः कामदुघा जनस्य सुदृढा भूयाद्भवानीपतौ ।
एवन्तां चतुराननेन्दुवदनापादारविन्दक्वणन्
मञ्जीरध्वनिमञ्जुलाश्च जगम(दु)त्सङ्गे कवीनाङ्गिरः ॥

Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधि-
कप्रबन्धनिर्वाहकश्रीमन्महाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्यश्रीमदा-
च्चादीक्षितपौत्रस्य श्रीनारायणदीक्षितात्मजस्य कैयटव्याख्यानशिवत-
त्त्वरहस्याद्यनेकप्रबन्धनिर्मातुः नीलकण्ठदीक्षितस्य तृतीयनन्द-

नेन गीर्वाणेन्द्रदीक्षितेन विरचितः शृङ्गारकोशो नाम भाणः समाप्तः ॥

Subject: Śṛṅgārakośabhāṇa.

Remarks:—The Ms. is in good condition.

Gīrvāṇendra Dīkṣita, the author of this bhāṇa tells us that he is the third son of the famous Nīlakaṇṭhadīkṣita. This Bhāṇa is similar to the previous ones and is not available in print.

॥ शृङ्गारजीवनम् ॥

4612. ŚṚṄGĀRAJĪVANAM.

Burnell's Catalogue No. 10651. Page 173. Right column. Substance—Palm leaf. Size—14¾ × 1½ inches. Leaves—34. Lines—5 to a Page. Script—Telugu. No. of Granthas—500. Author—Avadhānasarasvatī. Complete.

Beginning:

जेतुर्यस्य दिशां धनुस्तनुलताचामभ्रुवां कोकि....
...गषद्वदा............लिः शिञ्जिनी ।
...उत्पलप्रख्याः कटाक्षच्छटा
तस्याश्चर्यधनुर्धरस्य महिमा......... ॥

* * *

...कजासन नवनववैदिकालङ्कारस्य
भगवतः काञ्चीपुरेश्वरस्य....................

* * (सहर्षम्) आस्ते खलु समस्तविद्या-
भियोगसञ्जातप्रशस्तिरति कुलतिलकम् ....

.. (अवधानसर)स्वती नाम कविः ॥

तस्य कृतिं शृङ्गारजीवनं नाम भाणं प्रयोगेन

दर्शयन्.........

End:

तथापीदमस्तु भरतवाक्यम् ।

ता(रुण्य)मस्तु सुदृशां सततामिवृद्ध-

चन्द्रः समुल्लसतु सन्ततपूर्णबिम्बः ।

मासो मधुर्विहरतामनिशं वनेषु

(पुष्पायुधो) विजयतां भुवनैकवीरः ॥

Colophon:

इत्यवधानसरस्वत्याः कृतिः शृङ्गारजीवितं नाम भाणः

सम्पूर्णः ।

Subject: Śṛṅgārajīvana.

Remarks:—The Ms. is in a decaying condition.

The author of this bhāṇa is known as Avadhāna Sarasvatī. Nothing more is known of him. The bhāṇa is not available in print.

॥ शृङ्गारतिलकः ॥

4613. ŚṚṄGĀRATILAKAḤ.

Burnell's Catalogue No. 5295. Page 173. Right column. Substance—Paper. Size—9¾ × 3¾ inches. Sheets—62. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—950. Author—Rāmabadradīkṣita. Complete.

Beginning:

पाणिग्रहावसर एव दृढोपगूढा

रागस्पृशा रघुपतेर्नयनाञ्चलने ।

लज्जावशाञ्जनवधूरिव सङ्कुचन्ती
दृष्टिर्महीदुहितुरस्तु विभूतये वः ॥

End:

तथापीदमस्तु भरतवाक्यम् ॥

आचन्द्रार्कमिदं भवेदविरलं गोब्राह्मणेभ्यः शिवं
भूयस्त्वागमवृद्धसेविभिरियं राजन्वती राजभिः ।
लाल्यन्तां सरसोक्तयश्च कवयः श्वश्रद्दसंश्लैर्जनैः
स्यादेतस्य कवेश्च भक्तिरचला देवे रघूणां प्रभौ ॥

इति निष्क्रान्तः ॥

Colophon:

इति कौण्डिन्यकुलमण्डनरामभद्रकविवरविरचितः शृङ्गारतिलकं(को)
नाम भाणः सम्पूर्णः ॥

Subject: Śṛṅgāratilakabhāṇa.

Remarks:—The Ms. is in good condition.

For detailed remarks on Rāmabhadra Dīkṣita, the reader is invited to the Introduction to this bhāṇa in the Nirṇayasāgara Edition and the article on Rāmabhadra in the Indian Antiquary, Vol. XXXIII.

॥ शृङ्गारतिलकः ॥

4614. ŚṚṄGĀRATILAKAḤ.

Burnell's Catalogue No. 5296. Page 178. Right column.
Substance—Paper. Size—$10\frac{3}{4} \times 5\frac{1}{2}$ inches. Sheets—25.
Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—950. Author—Rāmabhadradīkṣita. Complete.

Beginning, end, colophon and subject—Same as No. 4613.

Remarks: —The Ms. is in good condition.

॥ शृङ्गारतिलकः ॥

4615. ŚṚṄGĀRATILAKAḤ.

Burnell's Catalogue No. 5297. Page 173. Right column. Substance—Paper. Size—9½×4½ inches. Sheets —50. Lines—8 to 9 to a Page. Script—Devanāgarī. No. of Granthas—550. Author—Rāmabadradīkṣita. Incomplete. (wants end)

Beginning—Same as No. 4613.

End:

(निरूप्य) ॥ पश्य निपुणिके ।

उन्नम्रलोलफ........... ।

Subject: Śṛṅgāratilakabhāṇa.

Remarks:—The Ms. is in a fairly good condition.

॥ शृङ्गारभूषणम् ॥

4616. ŚṚṄGĀRABHŪṢAṆAM.

Burnell's Catalogue No. 5272. Page 173. Right column. Substance—Paper. Size—10¾×4½ inches. Sheets—12. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—340. Author—Vāmanabhaṭṭabāṇa. Complete.

Beginning:

मैत्रीं येन मनोभुवो विरचयन्विश्वं जयत्यञ्जसा

येनोद्दीपनकारिणा विजयते शृङ्गारनामा रसः ।

रम्या यत्किरणाश्चकोरपरिषत्सौहित्यनाडिन्धमा
सोऽयं वः सुखमातनोतु जगतामानन्दनश्चन्द्रमाः ॥

End :

तथापीदमस्तु भरतवाक्यम् ॥

वेधो विष्णुमहेश्वरप्रभृतिभिः सम्भाविता निर्झरे
राज्ञां शम्बरशासनस्य महती लोकत्रये दीव्यतु ।
सत्स्वन्येषु रसेषु चास्तु विजयी शृङ्गार एको रसः
सत्साहित्यजनमण्डलं मृगदृशां तारुण्यमुज्जृम्भताम् ॥

Colophon :

इति श्रीवामनभट्टबाणविरचितः भाणः समाप्तः ॥

Subject: Śṛṅgārabhūṣaṇabhāṇa.

Remarks:—The Ms. is in good condition. This No. is given by Dr. Burnell in the errata list.

Śṛṅgārabhūṣaṇa of Vāmana Bhaṭṭabāṇa has been printed by the Nirṇayasāgara Press, Bombay. For information regarding Vāmana Bhaṭṭa, please refer to the Introduction to Pārvatīpariṇaya, Śrī Vāṇi Vilās Edition.

॥ शृङ्गारभूषणम् ॥

4617. ŚṚṄGĀRABHŪṢAṆAM.

Burnell's Catalogue No. 5278. Page 173. Right column. Substance—Paper. Size—9½ × 4½ inches. Sheets—15. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—345. Author—Vāmanabhaṭṭabāṇa. Complete.

Beginning, end and subject—Same as No. 4616.

Colophon:

इति श्रीवत्सकुलवामनभट्टबाणविरचितः शृङ्गारभूषणं नाम भाणः समाप्तः ॥

Remarks:—The Ms. is in a fairly good condition.

॥ शृङ्गारभूषणम् ॥

4618. ŚṚṄGĀRABHŪṢAṆAM.

Burnell's Catalogue No. 10638. Page 173. Right column. Substance— Palm leaf. Size—15 × 1⅛ inches. Leaves—12 (39-50). Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—300. Author—Vāmanabhaṭṭabāṇa. Complete.

Beginning, end, colophon and subject—Same as No. 4617.

Remarks:—The Ms. is in a fairly good condition.

॥ शृङ्गारभूषणम् ॥

4619. ŚṚṄGĀRABHŪṢAṆAM.

Burnell's Catalogue No. 10639. Page 173. Right column. Substance—Palm leaf. Size—17 × 1½ inches. Sheets—11 (72-82). Lines—8 to a Page. Script—Grantha. No. of Granthas—300. Author—Vāmanabhaṭṭabāṇa. Complete.

Beginning, end, colophon and subject—Same as No. 4616.

Remarks:—The Ms. is in a fairly good condition. At the beginning there are a few lines from the end of the Vṛttaratnāvalī and after the colophon is given the beginning of the Acyutarāyābhyudayā.

नालीकाक्षमलीकाक्षं नागेशयमगेशयम् ।
विपुङ्खवध्वजं धाम पुङ्खवध्वजमाश्रये ॥

अन्यादपूर्वो निधिरागमान्त-
माद्यो वृषाद्रेः पतिरच्युतेन्दुः ।
निरीक्षितुं निस्पृहकाङ्क्षितं ये
निरञ्जना एव जना क्षमन्ते ॥

धम्मिल्लशैवलधरा विराज-
द्पाङ्गमीनाध्रविलुमाप्ता ।
धन्या ·पितृच्छायतया.......
......श्रियमच्युतेन्दोः ॥

सुवर्णरूपैः शुभनायकारकै-
रौज्वल्यवद्भिर्ध्वनिमद्गुवानैः ।
परिष्कृतादिक्षितिपान् प्रभ...
.... ॥

॥ शृङ्गारभूषणम् ॥

4620. ŚṚṄGĀRABHŪṢAṆAM.

Burnell's Catalogue No. 10650. Page 173. Right column. Substance- Palm leaf. Size—16½ × 1½ inches. Leaves—12. Lines—7 or 8 to a Page. Script—Telugu. No. of Granthas--300. Author—Vāmanabhaṭṭabāṇa. Complete.

Beginning, end, and subject—Same as No. 4616.

Colophon:

इति श्रीवत्सकुलतिलकवामनभट्टबाणविरचितशृङ्गारभूषणम् नाम

भाणः समाप्तः ॥

श्रीकैलासाधिपाय नमः ॥ श्रीबृहदम्बायै नमः ॥ श्रीगुरवे नमः ॥

नवसंवत्सरचैत्रे मासि चतुर्थ्यां बुधस्य वारेऽस्मिन् ।

श्रीबालकृष्णविदुषा लिखितो भाणः स एव रसिकोऽभूत् ॥

Remarks:—The Ms. is in good condition. The Ms. was copied by **Bālakṛṣṇa.**

॥ शृङ्गारभूषणम् ॥

4621. ŚṚṄGĀRABHŪṢAṆAM.

Burnell's Catalogue No. 10641. Page 173. Right column. Substance—Palm leaf. Size—$14\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—13. Lines—7 or 8 to a page. Script—Grantha. No. of Granthas—300. Author—Vāmanabhaṭṭabāṇa. Complete.

Beginning, end, colophon and subject—Same as No. 4616.

Remarks:—The Ms. is in a decaying condition.

॥ शृङ्गारभूषणम् ॥

4622. ŚṚṄGĀRABHŪṢAṆAM.

Burnell's Catalogue No. 5274. Page 173. Right column. Substance—Paper. Size—$9\frac{1}{2} \times 3\frac{3}{4}$ inches. Sheets—12. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—170. Author—Vāmanabhaṭṭabāṇa. Incomplete.

Beginning and subject—Same as No. 4616.

End:

वाचालमञ्जीरमनोहरेण

पादेन पद्मोदरकोमलेन ।

वक्षःस्थले ताडनमाचरन्त्या
वराङ्गि सोऽयं क्रियतामशोकः ॥
सखे धनमित्र । इतः

Colophon : Nil.

Remarks:—The Ms. is in a good condition.

॥ शृङ्गारस्तबकः ॥

4623. ŚṚṄGĀRASTABAKAḤ.

Burnell's Catalogue No. 5298. Page 173. Right column. Substance—Paper. Size—9¾ × 4⅓ inches. Sheets—32. Lines—11 to a page. Script—Devanāgarī. No. of Granthas—930. Author—Nṛsimha. Complete.

Beginning:

भद्रं स वो दिशतु भक्तजनासपक्ष-
शिक्षाकृते सपदि पञ्चमुखायमानः ।
लक्ष्म्याः पयोधरतटीपरिरम्भलोभा-
दूरीचकार मुखमात्रमृगेन्द्रतां यः ॥

(नान्द्यन्ते)

सूत्रधारः ॥ आदिष्टोऽस्मि भर्मभयनिर्मलहर्म्यतलनिर्मितसु-
दतीगीतिरीतिनिशमनसमयपरवशविरिञ्चविषमीकृत -
प्रपञ्चविधानां निधानाधिकविपुलनिलयवलयकलित-
नीलोपलजलोदरसरविस्पृहविभापटलाघनघनाघनता -
ण्डनितशिखण्डिमण्डलां * * सकलवस्तुसं-
निधानमधुरां मधुरां नाम नगरीं सनाथीकृत्तो मैथिली-

लक्ष्मणसततपरिभूषितपार्श्वयुगलस्य * रामभद्रस्य ग्री-
ष्मसमययात्रामहामहयन्दनानन्दसुन्दीभवन्त्या समस्त-
शास्त्रकनकानिकषदृषदा परिषदा

शेषः प्रादुरभूदशेषपुरुषप्रोज्जीवनाय स्वयं
